CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्णिमा

इतिहास-प्रधान त्रैमासिक पत्रिका

५२

पूर्णाङ्क

संशोधन-मण्डल

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

का. मे. अ. द. नं. १५५/२४९

तदिह न गुणदोषौ योजनीयावलीकौ
कथमपि महता यत् संस्कृतोऽयं श्रमेण ।
—बापूदेव शास्त्री

[धेरै मिहिनेत गरी यो तयार गरिएको छ । यस कारण यहाँ भूटो गुण अथवा दोष नलाइदिनुहोला ।]

पूर्णिमा

१३ वर्ष

४ अङ्क

(इतिहास-प्रधान त्रैमासिक पत्रिका)

सम्पादक–
महेशराज पन्त
दिनेशराज पन्त

प्रकाशक–
देवीप्रसाद भण्डारी
(संशोधन-मण्डलद्वारा)

सहयोगी–
रामजी तेवारी

यस अङ्कको मूल्य रु. ८।–

CC-0. Nepal Sanskrit Academy, Kathmandu

विषयसूची

			पृष्ठ
१.	श्री ५ पृथ्वीनारायण शाहको उपदेशको व्याख्यात्मक संस्कृतपद्यानुवाद	–नयराज पन्त	१–४७
२.	तनहुँका राजा त्रिविक्रम सेनका दश अप्रकाशित पत्र	–महेश्वराज पन्त	४७–५०
३.	कालिदास, भास्कर, गणेश, कमलाकरका केही उक्ति	–नयराज पन्त	५२–५४
४.	स्वावलम्ब	–नयराज पन्त	५४

हाम्रा प्रकाशित केही कृति

संशोधन-मण्डलतर्फबाट

१. पूर्णिमा १ देखि ५२ अङ्कसम्म	२५६।५०
२. अभिलेख-सङ्ग्रह १ देखि १२ भागसम्म	७।५०
३. इतिहास–संशोधन	१३।
४. सावधान–पत्र	६।
५. विद्या–रत्ना	६।
६. व्याकरण–संशोधन	३।५०
७. पञ्चाङ्ग–संशोधन	३।५०
८. बुद्धिविनोद–प्रश्नावली र त्यसको उत्तर	२।
९. सावधान–पत्र (१८–३० सङ्ख्या)	१०।
१०. रत्नदीप	२।५०
११. वृत्तशतक	३।

नेपाल–सांस्कृतिक–परिषद्तर्फबाट

१. जयरत्नाकरनाटक	८।
२. त्रिरत्नसौन्दर्यगाथा	१०।
३. ऐतिहासिक–पत्रसङ्ग्रह (पहिलो भाग)	४।५०
४. ऐतिहासिक–पत्रसङ्ग्रह (दोस्रो भाग)	३।५०

जगदम्बा–प्रकाशनतर्फबाट

१. गल्लीमा फ्याँकिएका कसिङ्गर	६।२५
२. इतिहास–संशोधनको प्रमाण–प्रमेय	१८।
३. श्री ५ पृथ्वीनारायण शाहको उपदेश (१–५ खण्ड)	४१।

त्रि. वि. वि. पाठ्यक्रमविकासकेन्द्रतर्फबाट

१. गोलबोध	१३।७२
२. सुमतितन्त्र (त्रि. वि. वि. संस्कृतअध्ययनसंस्थानको आयोजनामा तयार भएको)	१०२।५०

नेपाल राजकीय प्रज्ञा–प्रतिष्ठानतर्फबाट

१. पण्डित गोपाल पाँडे र उनको घनमूल ल्याउने रीति	१६।४०
२. प्राचीन र नवीन गणितको तुलना	

CC-0. Nepal Sanskrit Academy, Kathmandu

(पूर्णिमा ५० अङ्कको ४० पृष्ठपछि)

श्री ५ पृथ्वीनारायण शाहको उपदेशको व्याख्यात्मक संस्कृतपद्यानुवाद

—नयराज पन्त

वंशक्रमाऽगतानि पदानि

मूलपाठः

स्वामित्को नुन्को उधार गर्नु. कालु कबर्दारका सन्तानलाई कबर्दारि नछुटाउनु. दषिनको घाहा सिवराम बस्न्यात्का सन्तानलाई नछुटाउनु. भोटको घाहा कालुपाडेका सन्तानलाई नछुटाउनु.

संस्कृतच्छाया

भर्तृपिण्डस्य गुणो न विस्मरणीयः। अन्तर्वंशिकपदं खड्काकुलीनस्याऽन्तर्वंशिकपदभाजः कालोः सन्ततिः प्राप्नोतु। दाक्षिणात्यं सान्धिविग्रहिकपदं शिवरामबस्न्यातस्य सन्ततिः प्राप्नोतु। भोटविषयकं सान्धिविग्रहिकपदं कालुपांडेः सन्ततिः प्राप्नोतु।

पद्यमयी व्याख्या

मह्यं वृत्तिं कुटुम्बाऽभरणसमुचितां भूमिपालो ददाति,
जीवाम्यस्य प्रसादाद्, अहमपि करवाण्यस्य हर्षं हितं च।
इत्थङ्कारं विचिन्त्य च्छलरहितमतिर् भर्तृपिण्डस्य हेतोर्
यो भृत्यश् चेष्टतेऽसौ रचयति सफलं लोकयुग्मं स्वकीयम् ॥२०७॥

स्वीयो भृत्यो न पीडाम् अनुभवतु, सदा सुस्थितो वर्ततां स,
इत्थं संचिन्त्य चित्तेऽनुभवति विधितः कष्टजातं स्वभृत्ये।

CC-0. Nepal Sanskrit Academy, Kathmandu

तत् संहर्तुं प्रसक्तः स्वकरणसदृशं दूरदर्शी महीपः
सख्यं प्राप्नोति सङ्ख्ये निपुणजनकृतं स्वेऽपरस्मिश् च कार्ये ।।२०८।।

स्वकरणसदृशम् = निजसाधनाऽनुरूपम्

सङ्ख्ये = युद्धे

आस्ते कः शौर्यचुञ्चुः, समरमुपगतं वीक्ष्य बेभीयते कः,
प्राज्ञः को, बालिशः को, नृपतिकृतिषु कश् चोष्णकः, शीतकः कः ।
एवं भृत्यान् परीक्ष्य स्वकृतिसमुचितं सत्कृतिं दण्डनं च
तेभ्यो यो जागरूको वितरति नृपतिस् तं न लक्ष्मीर् जहाति ।।२०९।।

शौर्यचुञ्चुः = शूरतया प्रसिद्धः
बेभीयते = नितरां बिभेति
बालिशः = मूर्खः
उष्णकः = अनलसः
शीतकः = अलसः

भोज्यं वस्त्रं च वासं स्वतनुविधृतयेऽपेक्षते सर्व एव,
गार्हस्थ्यं सेवमानः प्रभवति न जनस् तज्जचिन्तां विहातुम् ।
तत्साफल्यप्रसिद्ध्यै प्रभवति न धनं केवलं, किन्तु बुद्धिश्
चातुर्यं गेहनीतावपि च सुनियतं साधनं तत्प्रसिद्ध्यै ।।२१०।।

न्याय्यं मार्गं त्यजन्तः कुचरितनिरता दुर्जनाः स्वार्ऽर्थहेतोर्
हन्तुं साधून् मनुष्यान् अपि कपटभरैर् जातु नो संकुचन्ति ।
भूयांसो लोकमान्या जनहितकृतये बद्धदीक्षा महीपा
लब्ध्वा त्रुट्याऽपि हन्त स्वगृहजनितया नामशेषा बभूवुः ।।२११।।

शुद्धा नानोपधाभिः परिचितचरिताः प्राक्तनाः सद्मनुष्याः
प्रासादं भूमिभर्तुर् नृपतिमपि सदा साऽवधाना अवन्तु ।
पृथ्वीपालस्य हेतोर् विरचितमखिलं भोज्यवस्त्राऽऽदिजातं
तेषाम् अप्युत्तमस् तु प्रणिहितहृदयः संपरीक्षेत नित्यम् ।।२१२।।

उपधा = राजकीयानां पुरुषाणां राजभक्तेः परीक्षा

CC-0. Nepal Sanskrit Academy, Kathmandu

गुण्तान् सम्यग् विनीतान् विदधति मगरा बालकान् अस्मदीयान्,
अस्मद्गेहव्यवस्थापरिचितहृदयाः प्राय एते भवन्ति ।
कालुः खड्काकुलीनो व्यतनुत सुदृढां मद्गृहस्थां व्यवस्थां,
स्याद् अन्तर्वं शिकत्वाऽधिकृतपदमतः पुत्रपौत्रीणमस्य ।।२१३।।

साँगाचोकभवे रणेऽतिविकटे विध्वंसयन् वैरिणः
सेनानीः शिवराम ऐत् सुरपुरं बस्नेतवंशोद्भवः।
तत्पुत्रः पितृतुल्यवीर्यधिषणः केहेरसिंहाऽभिधो
निघ्नञ् शत्रुबलं महत् सतहुँजे युद्धेऽजहात् स्वान् असून् ।।२१४।।

ऐत् = अगच्छत्
धिषणा = बुद्धिः

निघ्नन्तः समरे रिपून् भुजबलात् षाड्गुण्यपद्याविदः
सेवन्ते शिवरामसिंहतनया मां भक्तिभाजोऽनिशम् ।
सेनानीर् अभिमानसिंह उदितां प्रज्ञां निजां दर्शयन्
सेनक्ष्मापतिभुज्यमानमजयद् देशं किराताऽभिधम् ।।२१५।।

पद्या = मार्गः

आसाते दक्षिणस्याम् अबधनरपतिस् ताम्रवक्त्राऽधिपश् च,
सेव्याऽऽस्माभिस् तु ताभ्यां सह नयसरणिः सूक्ष्मषाड्गुण्यनिष्ठा ।
जानीते दाक्षिणात्यं नृपतिनयपथं शैवरामी प्रसूतिः,
साऽऽस्मत्षाड्गुण्यमार्गे भजतु नियमतो दाक्षिणात्येऽधिकारम् ।।२१६।।

शैवरामी = शिवरामस्य अपत्यम्

आसीद् अस्मत्कुलीने नरपतितनये द्रव्यशाहे सुनीतिं
शौर्यं चाऽऽश्रित्य गोर्खां जयति विदधति क्ष्मापताम् आत्मवश्याम् ।
विप्रः पाँडेकुलीनः पटुतरधिषणो युद्धविद्याप्रवीणः
सख्यं कुर्वन् गणेशः, स्थिरसचिवपदं प्राप स द्रव्यशाहात् ।।२१७।।

CC-0. Nepal Sanskrit Academy, Kathmandu

कर्तुः श्लाघ्यां व्यवस्थां बहुजनहितदां रामशाहस्य मन्त्री
सल्ल्याने युद्धभूमावलभत शयनं कीर्तिशेषो गणेशः ।
वंशे विप्रस्य तस्याऽजनि कुशलमतिः क्षत्रियः कालुपाँडेः,
षाड्गुण्ये युद्धभूमावपि च समुचितं यो व्यधाद् मे सखित्वम् ।।२१८।।

भूभर्तुः कालुपाँडेर् अकृत मम हितं सर्वदा शुद्धभक्त्या,
बह्वीनां स प्रजानां व्यधित हितमपि स्वीयया तीक्ष्णबुद्ध्या ।
मल्लेशानां त्रयाणां समुदितपृतनां मर्दयन् कीर्तिपुर्यां
कालुः स्वर्लोकमाप्नोज् जगदतिसितया भासयन् स्वीयकीर्त्या ।।२१९।।

मल्लेशानां त्रयाणाम् = कान्तिपुरेश्वरस्य ललितपुरेश्वरस्य भक्तपुरेश्वरस्य

वर्तन्ते तत्तनूजा नयसमरविदो वंशराजाऽह्वयाऽद्यास्,
ते सम्यक् साधयन्ति प्रभुहितनिरताः स्वीकृतं कार्यभारम् ।
अस्माकं कूटमुद्राविषयजकलहो भोटभूपेन सार्धम्
आस्ते, बाह्यैर् निमित्तैर् अपि स कतिपयैर् वर्धनत्वं प्रयाति ।।२२०।।

आस्ते चीनाऽधिराजः सुविदितमहिमा रक्षको भोटभर्तुस्,
तस्माद् भोटेन सार्धं व्यवहृतिविधयेऽपेक्ष्यते नीतिवित्त्वम् ।
तत्रत्यं वृत्तमेते पटुतरधिषणा जानते कालुवंश्यास्,
तेनोदीच्योऽस्मदीयो भवतु नयपथः कालुवंश्याऽधिकारे ।।२२१।।

राजा स्वभृत्यान् स्वयं न हन्याद् नाऽपि घातयेत्

मूलपाठः

पाडे बस्न्यात् पंथ मैयाद मंत्रलाई मारातप् दिदा आलोपालो पालो गरि षान दिनु. ई मेरा नुन् षुन्का स्वक्षा सेवक हुन्. ईनीहरुको जीव जान्या बिराम गर्‍याको भया पनि आफुले नमार्नु. बरु मारातप दियेर लडाजीमा कोसिदिनु र जिव जोगाई आयो भन्या बढिया भयो. मरिगयो भन्या आफुले मार्नु अर्कैबाट मारिदियाको बढिया हुन्छ. तब राजाले सेवकलाई घरमा नमार्नु.

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतच्छाया

पाँडे-बस्न्यात-पन्थ-स्वबान्धव-मगराः पर्यायवृत्या राज्येऽधिकारभाजो वृत्तिभाजश् च भवन्तु । एते मम भर्तृपिण्डप्रत्युपकृतिपरा भक्ता भृत्याः सन्ति । उपरितनकुलीनः प्राणदण्डाऽर्हम् अपराधं कुर्वन्नपि जनो राज्ञा स्वयं न हन्तव्यो नाऽपि घातयितव्यः । प्राणदण्डाऽर्हम् अपराधं कुर्वाणं तं जनम् अधिकारभाजं विधाय कठिनायां युद्धभूमौ प्रेषयेद् राजा । स स्वदेहं त्रात्वा युद्धभूमेः प्रत्यागच्छेच् चेच् शोभनम् एव । स युद्धभूमौ म्रियेत चेत् स्वेन हन्तव्यः परेण हत इति शोभनम् एव । अतो राजा स्वभृत्यान् स्वयं न हन्याद् नाऽपि घातयेत् ।

पद्यमयी व्याख्या

पाँडे-बस्न्यात-पन्थाः प्रभुहितविषये जीवनं संत्यजन्ति,
वर्तन्तेऽस्मत्कुलीना धरणिपतिहितं साधयन्तः स्वबुद्ध्या ।
मन्यन्ते भर्तृहेतो रणभुवि मगराः स्वं शरीरं तृणाय,
पञ्चैते मामकीना मति-कृति-सचिवा राज्यभारं वहन्ति ॥२२२॥

मति-कृति-सचिवाः = मतिसचिवाः कार्यसचिवाश् च

भृत्यानां कार्यशक्तिं समरनिपुणतां शेमुषीं भक्ततां च
संप्राप्ते कार्यकाले समुचितविधिना साऽवधानः परीक्षे ।
पूर्वोक्ताः पञ्च चैते स्वकृतिषु सततं योग्यतां दर्शयन्ति,
न प्राप्ताः क्वाऽपि भृत्याः समुदितसुगुणास् तैः समाना मया तु ॥२२३॥

शेमुषीम् = बुद्धिम्

पञ्चानाम् एव तेषां मतिकृतिसलिलैः सिच्यमाना मदीया
नेतृत्वक्ष्मा प्रसूते मधुरफलमयं राज्यमेतद् विशालम् ।
तस्माद् एते लभन्तां स्वकृतिसमुचितां सत्क्रियां राजकीयाम्,
एते पर्यायवृत्याऽधिकृतिसहचरीर् उच्चवृत्तीर् लभन्ताम् ॥२२४॥

क्ष्मा = भूमिः

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्मद्राज्यस्य गुह्यं सकलमपि जनाः पञ्चवर्ग्या विदन्ति,
भिन्नेष्वेतेषु शत्रुश्रुतिविषयमियाद् गोपनीया कथा सा ।
अस्मद्राज्याऽतिमात्रोपकृतिकरतया गुह्यसाधर्म्यतश् च
भूपैर् अस्मत्कुलीनैर् उपरिनिगदिताः पञ्चवर्ग्या न वध्याः ।।२२५।।

तं मन्तुं चेद् विदध्याद् गदितकुलभवो यत्र दण्डो वधः स्याद्,
भूपा आगस्कृतं तं मम कुलजनुषः स्वाऽऽज्ञया नैव हन्युः ।
कस्मिंश्चिद् युद्धवह्नावधिकृतिसहितो दोषभाक् स प्रहेय,
आप्ताः केचिद् नियोज्याः समरसमुदितं बोद्धुमर्थं यथार्थम् ।।२२६।।

मन्तुः = आगः = अपराधः

युद्धक्षेत्रे प्रमथ्य प्रतिभटनिकरं त्रायमाणः स्वदेहं
प्रत्यागच्छेद् गृहं चेद् उपरिनिगदितो दोषमुक्तो भवेत् सः ।
संदीप्ते युद्धवह्नौ निजतनुहवनं चेत् स कुर्यात् तदाऽपि
हन्तव्ये स्वेन तस्मिन् परकरनिहते स्याद् अभीष्टं नृपस्य ।।२२७।।

परकरः = शत्रुहस्तः

अन्यायो रोधनीयः

मूलपाठः

सब राजाले ठूलो निसाफ हेर्नु. अंन्याय मलुकमा हुन नदिनु.

संस्कृतच्छाया

राजा धर्माऽऽसनम् अध्यास्य सम्यग् व्यवहारान् पश्यतु, अन्यायं निरुणद्धु ।

पद्यमयी व्याख्या

मुग्धानां सज्जनानाम् अपि धननिचयं क्षेत्रगेहाऽऽदिकं च
व्याजान् नानाप्रकारान् विदधति कितवा आत्मसात् कर्तुकामाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दुष्टानां दुश्चरित्रं सुजनधनहरं सर्वतो वीक्षमाणा
बेभीयन्ते शठेभ्यः सुचरितनिरता मुग्धचित्ताश् च लोकाः ॥२२८॥

कितवाः = छलरताः
बेभीयन्ते = भृशं बिभ्यति

अस्माभिर् जातु मन्तुः क्वचन न विहितो लेशमात्रोऽपि, तस्माद्
दुष्टैः संपीड्यमानान् कथमिव नृपतिर् नोद्धरेद् नो विवेकी ।
इत्याशाबद्धचित्ता धरणिपरिवृढद्वारमायान्ति लोका,
औदासीन्यं नृपाले श्रयति भजति तान् विस्मयः खेदपूर्णः ॥२२९॥

नः = अस्मान्

निश्चेतुं न्याय्यमार्गं प्रभवति नृपतिर् नो इदानीन्तनोऽयम्
इत्थं लोकप्रवादे प्रचलति जनता न्याय्यमार्गे दृढाऽस्थाम् ।
धत्ते न स्वीयचित्ते, कुचरितनिरता भ्रष्टलक्ष्या क्रमेण
साऽऽत्मानं भूमिपालं निजमपि पतितं लोकयुग्मे करोति ॥२३०॥

न्यायं निष्पक्षपातं निजजनपदजाः सर्व आसादयन्तु,
दण्डं दोषाऽनुसारं भजतु कुचरितो लौकिकानां समक्षम् ।
एवं भावं दधानो नृपतिरवहितः शीतकत्वं विहाय
कार्याऽर्थिभ्यः प्रयच्छेत् समयसमुचितं दर्शनं द्वारभाग्भ्यः ॥२३१॥

शीतकत्वम् = अलसत्वम्

धर्माऽचारव्यवस्थाः स्मृतिषु निगदिता लौकिकीश् चाऽपि सम्यग्
विद्वद्भिर्दृष्टकार्यैर् व्यवहृतिपटुभिः पारिषद्यैः समेतः ।
अर्थिप्रत्यर्थियुग्मं धरणिपरिवृढः कारयित्वा समक्षं
पश्येद् धर्माऽसनस्थो व्यवहृतिविषयान् कामलोभाऽदिहीनः ॥२३२॥

पारिषद्यैः = सभासद्भिः
अर्थी = वादी
प्रत्यर्थी = प्रतिवादी

CC-0. Nepal Sanskrit Academy, Kathmandu

उत्कोचग्राही दण्डनीयः

मूलपाठः

निलानिसाप बिगार्‍र्या भन्याको घुस् दिन्या र घुस षान्या ईन दुईको ता धन जिव गरिलियाको पनि पाप छैन. ई राजाका महासतुर हुन्.

संस्कृतच्छाया

उत्कोचं दाता ग्रहीता चाऽन्यायं प्रसारयत । एतौ कण्टकरूपौ स्तः । एतयोर् धनं प्राणांश् चाऽपि हरन् राजा दोषभाग् न भवति ।

पद्यमयी व्याख्या

आदत्ते कार्यिकाद् योऽधिकरणपुरुषो द्रव्यमस्मै च दत्ते
यः कार्यी, तौ विधत्तः समकुकृतमुभौ न्यायमार्गाद् अपेतम् ।
प्राणान् रिक्थं च सर्वं प्रसभमभिहरन्नेतयोस् तु क्षितीशो
दोषं नाऽऽप्नोति कश्चित् कुचरितरतयोर् एतयोः कण्टकत्वात् ॥२३३॥

कार्यिकः = कार्यी = कार्याऽर्थी
रिक्थम् = धनम्

सैनिका आनुकूलिकं भोजनपर्याप्तं क्षेत्रखण्डं वेतनत्वेन लभन्ताम्

मूलपाठः

उप्रान्त ॥ जढ कुरो राजालाई चाहीन्या सिपाहीहरूको घर षेत् मिलाईदिनु र मल् जल् गछन् र डुबो बोझि भित्र हाल्न पाउछन् र कबिलाको निर्फिक्रि हुन्छ. ढोकामा भया पनि गौडामा भया पनि सिपाहिहरूको छाति बलियो रहन्छ.

संस्कृतच्छाया

अथ राज्ञः प्रधानम् अङ्गं सैनिकाः । सैनिकाः स्वगृहस्याऽनुकूलिकं क्षेत्रखण्डं वेतनत्वेन लभन्ताम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तस्मिन् क्षेत्रे ते कृष्युपयुक्तं सेतुबन्धाऽऽदिकं कुर्वाणाः कर्षकत्वेन स्वामित्वेन च लभ्यौ भागधेयौ लब्ध्वा स्वगृहजनान् भोजयितुं समर्था भवन्ति । गृहचिन्तारहिताः सैनिका राजधान्यां राष्ट्रियेषु दुर्गेषु च योद्धुं समर्था भवन्ति ।

पद्यमयी व्याख्या

कोषं कुप्यं गवाश्वाऽऽदिकमपि सकलं हर्तुकामाः सशस्त्रा
जायन्ते चौरसंघा निहतबहुजना बद्धवैराः प्रजाभिः ।
चौरेभ्यस् त्रस्तचित्ता नरपतिशरणं प्राप्तुकामाः प्रजाः स्वा
यो न त्रायेत राजा, कृशतरयशसो भूपता स्यात् क्षताऽस्य ॥२३४॥

कोषम् = सुवर्णं रजतं च
कुप्यम् = कोषाद् अन्यद् द्रव्यजातम्
भूपता = राज्यम्
क्षता = नष्टा

स्वीयाम् उल्लङ्घ्य सीमाम् अपरजनपदं प्राप्य तत्रत्यभूमिं
याश्च् शक्तिं स्वकीयां रचयितुमनसो भूमिपाला भवन्ति ।
सीम्ना संबद्धभूमिर् धरणिपतिरतो भण्यते नीतिकारैः
शत्रुः, शत्रोर् नृपालाद् भवतु नरपतिः साऽवधानः सदैव ॥२३५॥

भूपालश् चौरसंघान् दमयितुमनिशं तिष्ठतां स्वीयशक्तौ,
रोद्धुं प्रत्यर्थिसीमाप्रसरणमपि च प्रक्रमेत स्वशक्त्या ।
कार्यद्वन्द्वं नृपस्य प्रमुखतममिदं गीयते नीतिकारैर्,
एतद्द्वन्द्वं न सिद्ध्येद् यदि तु नहि भवेत् स्थायिनी वाहिनी स्वा ॥२३६॥

तिष्ठतां स्वीयशक्तौ = स्वशक्तिं स्थेयत्वेन गृह्णातु
वाहिनी = सेना

वृत्तेर् हेतोर् मनुष्या रणविधिनिपुणा आश्रयन्ते महीशं,
ते लब्ध्वा सैनिकत्वं धरणिपरिवृढात् क्षेत्रखण्डं लभन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

योद्धृभ्यः क्षेत्रखण्डं निजगृहनिकटं स्वाऽनुकूल्येन देयं,
स्वामित्वात् कर्षकत्वाद् अपि च समुदिते द्वे फले ते लभन्ताम् ॥२३७॥

स्वीये केदारखण्डे सुविहितकृषयो वेतनत्वेन लब्धे
सस्येनोत्पत्तिभाजा निजसदनजनान् सैनिकाः पोषयन्तु ।
पुष्टे स्वे भृत्यवर्गे निजगृहगतया चिन्तया मुच्यमाना
राजद्वारे च दुर्गेऽपि च नृपतिकृतौ नो भटाः संकुचन्ति ॥२३८॥

केदारः = क्षेत्रम्

सांयुगीनाः पदवृद्धिं लभन्ताम्

मूलपाठः

पजनि गर्दामा पनि सये नालका कंम्पनी जमाउनु र र सये नालका सुबेदार चार पाच लडाजोमा जस पाई आयाका यस्ता आफुले जाचि सुबेदार हाल्नु. सुबेदारले पनि सातपगरि दुई चार बाढ पायाका यस्ता सातपगरि हाल्नु. सातपगरिले स्वह्न हुद्दा हाल्दा आफुसित मर्ने मार्न्य जाचि १६ हुद्दा हाल्नु. १६ हुद्दाले पनि आफसित मर्ने मार्न्य जाची सिपाही हालि आपना आपनापाट्ट भर्ना गर्नु.

संस्कृतच्छाया

प्रतिसैनिकवर्गं शतम् अग्निशस्त्रभाजः सैनिका भवन्तु। चतुर्ष्वपि युद्धाङ्गणेषु लब्धकीर्तिं सुयोधं राजा स्वयं परीक्ष्य वर्गस्य शासितारं पत्त्यध्यक्षं नियुङ्क्ताम्। दृष्टद्वित्रयुद्धान् भटान् परीक्ष्य पत्त्यध्यक्षः सप्त मुख्यान् नियुङ्क्ताम्। सप्त मुख्याः स्वैः सह युद्धभूमौ जीवं वा पातयामः कार्यं वा साधयाम इति गर्जतो भटान् परीक्ष्य षोडश नायकान् नियुञ्जताम्। षोडश नायकाः स्वैः सह युद्धभूमौ जीवं वा पातयामः कार्यं वा साधयाम इति गर्जतः शूरान् परीक्ष्य भटत्वे नियुञ्जताम्। एवं वर्गः सुघटितो भवतु।

पद्यमयो व्याख्या

पद्गैर् वह्न्यस्त्रभाग्भिर् भवतु शत^(?)मितैः सैनिकैर् वर्ग एकः,
पत्त्यध्यक्षत्वमाप्तः प्रकटितगरिमा सैनिकः शास्तु वर्गम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

विक्रान्तं शौर्यचुञ्चुं बहुषु च समरेष्वाप्तकीर्तिं सुयोधं
पत्त्यध्यक्षं विदध्यात् स्वयमवनिपतिस् तद्गुणान् संपरीक्ष्य ।।२३९।।

शौर्यचुञ्चुम् = शूरत्वेन प्रसिद्धम

स्थाने युद्धेऽवसारे विहितपरिचयान् द्वित्रयुद्धाऽङ्गणेषु
पत्त्यध्यक्षः सुयोधान् स्वयमथ कुरुतां सप्त° मुख्यान् परीक्ष्य ।
युद्धे शत्रून् निहन्तुं स्वयमपि नशितुं तत्परान् स्वेन साधं
सुज्ञातान् सप्त° मुख्या विदधतु सुभटान् नायकान् अष्ट''संख्यान् ।।२४०।।

संग्रामे स्वेन सार्धं रिपुबलमसितुं प्राणमोहं विहाय
सक्तान् विक्रान्तचित्तान् रणविधिनिरतान् नायका अष्ट''संख्याः ।
संगृह्णीयुः स्ववर्गेऽधिगतभटपदांस् तान् विदध्युः परीक्ष्य,
वर्गे बह्वस्त्रभाजः प्रभुहितनिरताः सांयुगीना भवन्तु ।।२४१।।

असितुम् = प्रक्षेप्तुम

आयुधीया जातयः

मूलपाठः

पट्टी पट्टिमा सिराहि पनि षस् मगर गुरुं ठकुरि ईनै चार जात मात्रै षिचोला गरिहाल्नु र तर्वार पर्दा साह्लो हुन्छ. सुहा च्यापन्या पनि इनै चार जात मात्रै हुनं र त(र)वार पर्दा साह्लो हुन्छ र वैरि त क्या इन्द्रको आसन् पनि डगाईछ.

संस्कृतच्छाया

सैनिकानां संघट्टने विधीयमाने खशा मगरा गुरुङ्गाष् ठकुरय इति चतसृषु जातिषु जाता मानवा एव खण्डे खण्डे शबलीकृत्य सैनिकत्वेन नियोज्याः । अत्राऽयुधीया जातय एताश् चतस्र एव सन्ति । एताभिश् चतसृभिर् जातिभिः संघट्टिता सेना रणभूमौ बलिष्ठान् अपि शत्रून् कम्पयेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पद्यमयी व्याख्या

विद्यां शिल्पाऽऽदिकं च स्वकुलसमुचितं शैशवाद् एव मर्त्याः
कर्णाभ्यां लोचनाभ्याम् अपि च विदधते मानसे स्वे निसर्गात् ।
तस्माद् आसेव्यमाने निजकुलपुरुषैर् वर्तने मानवानां
स्वल्पाऽऽयासेन बुद्धिः प्रविशति, सुफलं ते लभन्ते च तत्र ।।२४२।।

वर्तने = जीविकायां

ठकुरयो गुरुङा मगराः खशाः
स्वकुलजं दधते रणनैपुणम् ।
उपरिभाषितजातिचतुष्टये
रणमुखे पटुता मयकेक्षिता ।।२४३।।

वर्तन्ते सांयुगीना उपरिनिगदिता जातयोऽमूश् चतस्रः,
खण्डे खण्डे नियोज्या उपरिनिगदिता मानवाः सैन्यवर्गे ।
एवं संघट्ट्यमाना रणविधिकुशलैर् मानवैर् अस्मदीया
सेना संग्रामभूमौ रिपुजनहृदयं कम्पयेद् विक्रमेण ।।२४४।।

शस्त्रसंग्रहः

मूलपाठः

हजारौ धना हजारौ पथर्काला हजारौ षुडा हजारौ तोप भया इन्द्रको आसन पनि डगाईछ.

संस्कृतच्छाया

सहस्राणि धनूंषि, सहस्राणि वह्निमयगुलिकाः प्रक्षिपन्ति नलिकारूपाणि शस्त्राणि, सहस्राणि खड्गाः, सहस्राणि वह्निमयस्थूलगोलान् प्रक्षिपन्त्यः शतघ्न्यो यस्य स्युः, स बलिष्ठान् अपि रिपून् वशीकुर्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पद्यमयी व्याख्या

चापाः खड्गाः शतघ्न्यो दहनजगुटिकाः प्रक्षिपन्त्यायुधानि
यत्पार्श्वे स्युः सहस्राण्यरिजनहृदयं कम्पयन् सर्वदा सः ।
कुर्यात् स्वीयप्रतापात् स्खलितमिव शचीनाथसिंहासनं च,
श्रेष्ठानाम् आयुधानां धरणिपतिरतः संग्रहे यत्नवान् स्यात् ।।२४५।।

शचीनाथसिंहासनम् = इन्द्रस्य सिंहासनम्

योद्धारस् तत्सहायकाश् च

मूलपाठः

लडाजीमा पनि हान्न्या र सघ दिन्या ई दुवै बरोबर हुन्. जागिर दिदा पितल् दिदा दुवैलाई बरोबर दिनु.

संस्कृतच्छाया

युद्धे शत्रून् हन्तारः सैनिकाः, विविधैर् अन्यैः प्रकारैः सहायकाश् च समम् उपकुर्वन्ति । अतो राजा वैतनिकत्वप्रदाने भूमिप्रदाने च तेभ्य उभयेभ्योऽपि समानम् अधिकारं दातुम् अर्हति ।

पद्यमयी व्याख्या

गत्वा संग्रामभूमिं रिपुबलमसितुं दर्शयन् विक्रमं स्वं,
स्थित्वाऽन्यत्र प्रदेशे समरभुवि गतान् साधु पुष्णञ् जनश् च ।
तुल्यं भारं वहन्तौ सममुपकुरुतः स्वप्रयासैर् जिगीषुं,
तस्मात् तौ प्राप्नुयातां सममवनिपतेर् वार्ततां वेतनं च ।।२४६।।

वार्तः=वृत्तिभुक्

युद्धे हतस्य स्वसैनिकस्य गृहजनाय राजा जीविकां ददातु

मूलपाठः

मन्यो मन्या उसका छोरा षुडा हान्न्या नहुन्ज्याल मरवट् दिनु. षुडा हान्न्या भयापछि जागिरमा उकालिदिनु र

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतच्छाया

युद्धे स्वसैनिके हते कवचहरे तत्पुत्रे चाऽसति तद्गृहजनाय राजा वृत्तिं ददातु । कवचहरदशां प्राप्तस् तत्पुत्रः सैनिकत्वेन वृत्तिं लभताम् ।

पद्यमयी व्याख्या

गन्तुः संग्रामभूमिं रिपुबलमसितुं तस्थुषो वीरलोकं
बालाऽपत्याऽऽदिकानां भवतु वसुमतीपालको वृत्तिदाता ।
विक्रान्तस्याऽस्य सूनुः कवचहरदशाम् आप्तवान् सैनिकोऽस्तु,
दर्शं दर्शं स्वशौर्यं रणभुवि लभतां पैतृकं गौरवं सः ।।२४७।।

वसुमतीपालकः = राजा

तातो माता च वृद्धौ, शिशुरपि तनयो, गेहिनी बालपुत्रा,
तेषाम् एकोऽहमासे कथमपि धरणौ जीवनत्राणहेतुः ।
संप्राप्ते कालवक्त्रं मयि यमसदनं तेऽपि सर्वे व्रजेयुर्,
इत्थं चिन्तानिमग्नो भवति नहि जनः साहसं कर्तुमीशः ।।२४८।।

यमसदनं व्रजेयुः = म्रियेरन्

हन्यां चेच् शत्रुवर्ग्यान् रणभुवि विपुले कीर्तिलक्ष्म्यौ लभेय,
चेद् हन्येय द्विषद्भिः क्षितिपतिततनुः प्राप्नुयां स्वर्गलोकम् ।
मत्पुत्राऽऽद्याश् च वृत्तिं निजतनुधृतये राजकीयां लभेरन्-
नित्याकारे विचारे हृदि सति समरे शूरताम् एति योधः ।।२४९।।

वीराः सन्तु स्वसैन्याः, क्षपितरिपुबलाः सन्तु ते युद्धभूमौ,
श्रुत्वाऽऽस्मत्सैन्यशक्तिं भयचकितहृदो दस्यवः सन्तु नित्यम् ।
एतां चिन्तां दधानो धरणिपरिवृढो युद्धभूमौ हतस्य
सैन्यस्य स्वस्य गेहं क्षुधितपरिजनं नैव कुर्वीत जातु ।।२५०।।

दस्यवः = चौराः शत्रवश् च

CC-0. Nepal Sanskrit Academy, Kathmandu

राज्ञा विवेकिना भाव्यम्

मूलपाठः

राजाले विवेक राखीदिया देसदेसका सिपाहि पनि आसा राखी आउन्छन् र यस्व भया तरवारीया सिपाहि हात लाग्छन्.

संस्कृतच्छाया

राजनि विवेकभाजि सति दवीयसोऽपि देशात् सैनिका आशया तस्य सेवायै समुपगच्छन्ति । अतः स विवेकी भूपः कृतहस्तान् योधान् प्राप्तुं प्रभवति ।

पद्यमयी व्याख्या

पृथ्वीपाले विवेकाद् विदधति गुणिनां सत्कृतिं सैनिकानां
शस्त्राजीवेषु कीर्तिः प्रसरति विमला दूरदेशेऽपि तस्य ।
दूराद् दूराच् च कीर्तिश्रुतिसमुपगतान् भूयसः शौर्यचुञ्चून्
शस्त्रप्रावीण्यभाजः समरभुवि सखीन् सैनिकान् विन्दते सः ।।२५१।।

विन्दते = लभते

राज्ञः सारः सैनिकाः प्रजाश् च

मूलपाठः

राजाका सार भन्याको सिपाहि र रैतिहरु हुन्. राजा चतुर भया सिपाहि र रैति हातहात गरिराख्नु र हुल्-कुल् हुन पाँउदैन.

संस्कृतच्छाया

राज्ञः सारो नाम सैनिकाः प्रजाश् च । चतुरो राजा सैनिकान् प्रजाश् च रञ्जयतु । एवं सति लोक-विप्लवो निरुद्धो भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पद्यमयी व्याख्या

मुख्यः सारः पदार्थो भवति नरपतेः सैनिकाश् च प्रजाश् च,
भूपश् चातुर्यशाली न वहतु नहि तद्रञ्जनाय प्रयत्नान् ।
सैन्ये लोके च रक्लेऽनुसरति नियमान् राज्यविध्वंसहेतुर्
मात्स्यो न्यायोऽपयाति, प्रमुदितमनुजैर् गीयते भूपकीर्तिः ॥२५२॥

सैनिका उद्धर्षणीयाः

मूलपाठः

सिपाहि भन्याको तिषारिराषनु. तिषारिराष्याका सिपाहि कसैका मलाजामा पर्तनन् र आपनु काज फत्य हुन्छ.

संस्कृतच्छाया

सैनिका उपधाभिः परीक्षणीया उद्धर्षणीयाश् च । एवं सति ते परेषाम् उपजापं न सहन्ते, स्वकार्यसिद्धिर् भवति ।

पद्यमयी व्याख्या

सम्यक् कार्यं विधत्ते प्रभुहितविधये वर्तते च प्रसक्तो
यो भृत्यः प्राप्नुयात् स स्वकृतिसमुचितं वेतनं सत्कृतिं च ।
आलस्यं संविधत्ते प्रभुहितमपि नो कर्तुमीष्टे स्वशक्त्या
यो भृत्यः प्राप्नुयात् स स्वकृतिसमुचितं दण्डनं न्यक्कृतिं च ॥२५३॥

न्यक्कृतिम् = तिरस्कारम्

इत्थं संचिन्त्य चित्ते निजभटचरिते दत्तचक्षुर् नृपालस्
तेषां चारित्रशुद्धौ समुचितविधिना वर्ततां जागरूकः ।
यत्सैन्याः सच्चरित्राः परजनविहितं नोपजापं सहन्ते,
संग्रामे तं जयश्रीर् अपि करुणदृशा वीक्षते साऽनुरागा ॥२५४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दुर्गपालानां नियुक्तिः

मूलपाठः

गुरुं मगर षान्ज्यादा सैयाद मारादार मिर उमराउ थरघर पुराना पुराना जाची घुंडा गौडामा राषनु.

संस्कृतच्छाया

गुरुङ्गा मगरा नृपतिकुलजाः स्वबान्धवा राज्यव्यवस्थाधिकृताः सेनाधिकृताः षट्कुलसंज्ञवंशजाश् च दृष्टक्रियाः परीक्षिताश् च जना दुर्गपाला विधेयाः ।

पद्यमयी व्याख्या

गुरुङ्गा मगरा नृपालवंश्याः स्वकुलीनाः प्रमुखाऽधिकारभाजः ।
पृतनाऽऽधिकृताः कुलक्रमाऽऽप्ता मनुजाः षट्कुलसंज्ञवंशजाश् च ।।२५५।।

उक्तानां मानवानां रणविधिनिपुणा दृष्टभूरिक्रियाश् च
शुद्धा नानोपधाभिर् नृपतिहितरता ये जनाः संभवेयुः ।
तान् आप्तान् एव पुंसो धरणिपरिवृढो दुर्गपालान् विधाय
सम्यक् त्रायेत राष्ट्रं रिपुजनहृदयं कम्पयन् सैन्यशक्त्या ।।२५६।।

तिरोजनपदा महत् पदं न लभेरन्

मूलपाठः

पुरुब पछिम्का षस बाहुनलाई दरबारमा पेठ् हुनु नदिनु. बयान भनैला बाहिडा मान्छ्याले दरबारमा बिथिति गराउछन्.

संस्कृतच्छाया

प्राच्याः प्रतीच्याश् च खसा ब्राह्मणाश् च महान्तं राज्याधिकारं न प्राप्नुयुः। किमिति चेत् तिरोजनपदा राज्यव्यवस्थाम् आकुलीकुर्वन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पद्यमयी व्याख्या

भूयांसः सन्ति भूपा दिशि दिशि धरणिपालवंशप्रसूता
द्यूतस्वापाऽबलासु प्रणिहितमनसो दानयुद्धप्रहीणाः ।
श्रुत्वा श्रुत्वाऽस्मदीयं विभवमनुदिनं वर्धमानं नृपास् ते
भायं भायं लषन्ति प्रतिघपरिवृता अस्मदीयं विनाशम् ।।२५७।।

प्रतिघः = क्रोधः

भूपाः प्राच्याः प्रतीच्या अपि भयविवशा युञ्जते गूढरूपान्
स्वान् दूतान् विप्रवंश्यान् खसकुलजनुषश् चाऽस्मदीयक्षयाय ।
अस्मद्राज्यव्यवस्थां परजनपदजास् ते छलाद् दूषयेयुस्
तस्मात् तेषां प्रवेशो नहि भवतु रहो-राजकृत्येऽस्मदीये ।।२५८।।

रहो-राजकृत्ये = गोपनीयायां राज्यव्यवस्थायाम्

राजकीयं शासनं राजा स्वयं लेखयेत्

मूलपाठः

राजाको हुकूम जफत गरि राषनु.

संस्कृतच्छाया

राजकीयं शासनं राजा स्ववशीकरोतु ।

पद्यमयी व्याख्या

आज्ञा राज्ञो नियोक्तुं प्रभवति सकला राज्यनिष्ठा व्यवस्थाः,
शुश्रूषन्ते समस्ता अधिकृतपुरुषास् तां जनाः कार्यिणश् च ।
संप्राप्ते कार्यकाले नरपतिवचनं लिप्समाना जनास् चेत्
तद्वाक्यं नो लभेरञ् जनपदमखिलं निष्क्रियत्वं श्रयेत ।।२५९।।

शुश्रूषन्ते = श्रोतुम् इच्छन्ति
लिप्समानाः = लब्धुम् इच्छवः

CC-0. Nepal Sanskrit Academy, Kathmandu

उत्पन्नं कार्यजातं भवति जनपदे यत्र यत्र स्वकीये,
स्वीयाम् आज्ञां प्रदातुं प्रभवति न नृपस् तत्र तत्रैव गन्तुम् ।
सर्वाः स्वाऽऽज्ञा निधातुं स्वमनसि सततं नैव शक्नोति भूपः,
सर्वाऽऽज्ञा राजकीयाः सततमधिकृता नो कृतौ संस्मरन्ति ॥२६०॥

कृतौ = कार्ये समागते

पत्राऽऽदौ बद्धलेखा किमपि च दधती लक्षणं राजकीयं
भूपालाऽऽज्ञा प्रजानां मनसि दृढतरं प्रत्ययं संतनोति ।
सैवाऽऽज्ञा शास्ति लोकान्, इति नयनिपुणैः शासनं कथ्यते सा,
तेषां दृष्टौ शरीरी न भवति नृपतिः शासनं ह्यस्ति भूपः ॥२६१॥

लक्षणम् = चिह्नम्
प्रत्ययम् = विश्वासम्

पत्राऽऽदौ बद्धलेखा किमपि च दधती लक्षणं राजकीयं
राजाऽऽज्ञा शास्ति लोकान्, धरणिपतिरतो लेखयेत् साऽवधानः ।
तादृक् पत्रं, प्रमादं भजति नरपतौ लेखने शासनस्य
लोकः पर्याकुलत्वं भजति, च नितरां दैन्यमाप्नोति राष्ट्रम् ॥२६२॥

योग्योऽन्तपालो राष्ट्रं रक्षति वर्धयति च

मूलपाठः

मैले तिं थुम्का वह्राहा उमराउलाई ईन्द्रवज् तुल्याई राख्याथ्या. नगरा निसान पनि दिई राख्याथ्या. बाह्लबिसको गाडो(ठो) बाँधी दियाको थीयो र सल्ल्यानि लिग्लीग् धार्दिका मुहुडामा जाहा जाहा काज गर्थ्यो. फत्य गर्थ्या र यो अैस्वर्ज गर्‍याको हो.

संस्कृतच्छाया

सल्ल्याने लिगलिगे धादिङ्के च स्थितानां दुर्गपालानां दुर्गोत्तरेशो मम कृपया वार्षिकीं चत्वारिंशदुत्तरशतद्वयरूप्यकात्मिकां वृत्तिं लभते स्म । सपटहरवेण सैनिकवन्दनेन ध्वजेन च स सदक्रियत ।

CC-0. Nepal Sanskrit Academy, Kathmandu

उपरिकथितेषु प्रदेशेषु जायमानासु रणक्रियासु स शत्रुप्रयोगान् स्वयं विफलयति स्म । तदुद्योगेन ममैषा श्रीर् अजायत ।

पद्यमयी व्याख्या

पाश्चात्याः सौम्यदिक्स्था लिगलिगशिखरे सैनिकैर् वर्तमानैस्
त्रायन्ते स्म प्रदेशाः, ककुभि सुरपतेर् वर्तमानाः प्रदेशाः ।
योधैः सल्ल्यानकोटे विहितवसतिभिस् त्रायमाणा अभूवन्,
याम्याः प्राच्याश् भागाः कतिचन सुभटैं रक्षिता धाद्डिङस्थैः ।।२६३।।

सौम्यदिक्स्थाः = उदीच्याः
ककुभि सुरपतेर् वर्तमानाः = प्राच्याः
याम्याः = दाक्षिणात्याः

भागत्रय्या विभक्तं प्रथमगदितया गोरखाराज्यमासीद्,
एकैको दुर्गपालः प्रणिहितहृदयो रक्षति स्म स्वभागम् ।
निर्दिष्टं दुर्गपालत्रितयमपि निजे योजयन् कार्यजाते
ख्यातो दुर्गोत्तरेशो रणविधिनिपुणो गोरखाराज्य आसीद् ।।२६४।।

आसीद् दुर्गोत्तरेशः स मम बहुमतो, विंशतिं रूप्यकाणि
मासे मासे स आप्नोत् सहपटहरवं वन्दनं केतनं च ।
यस्मिन् भागे रिपूणाम् अजनि भयमसौ तत्क्षणं तत्र गच्छन्
निघ्नञ् शत्रून् समस्तान् अकृत च धरणीं निःसपत्नां मदीयाम् ।।२६५।।

सहपटहरवं वन्दनम् = सैनिकैः क्रियमाणं तूर्यध्वनिपूर्वकं नमस्कारम्
केतनम् = ध्वजम्

वीरस्यैतस्य शौर्ये स्फुरति जनपदे मामकीने सपत्नाः
क्षेप्तुं पादान् अशक्ता अजनिषत शनैः साध्वसाऽऽक्रान्तचित्ताः ।
गुप्ते राज्ये स्वकीये जनपदमपरं वाहिनी चाऽस्मदीया–
ऽऽशक्नोद् निःशङ्कमेतुं सकरुणनयनाऽस्मासु लक्ष्मीर् अभूच्च ।।२६६।।

CC-0. Nepal Sanskrit Academy, Kathmandu

राजा पितृपैतामहान् उपधाशुद्धान् भृत्यान् पार्श्ववर्तिनो विदध्यात्

मूलपाठः

आफ्ना घरका पुराना सेवक जाची हजूरमा हरोदम् राखी दरोबस्त बाधि घर बलियो राखनु. यस्व भया दरबार बलियो रहन्छ.

संस्कृतच्छाया

पितृपैतामहान् स्वभृत्यान् परीक्ष्य राजा स्वपार्श्ववर्तिनः करोतु। सम्यग् विनीतैस्तु तै राजप्रासाद-व्यवस्थां सम्यक् कारयतु राजा। एवं सति राज्यव्यवस्था दृढा भवति।

पद्यमयी व्याख्या

भृत्यान् वंशक्रमाऽऽप्तान् परिचितविनयान् राजगेहस्थकृत्ये
सम्यग् नानोपधाभिः प्रणिहितहृदयः संपरीक्षेत भूपः।
प्रज्ञा शौर्यं च भक्तिस् त्रितयमपि भवेद् वर्तमानं च येषु,
तान् एव स्वीयभृत्यान् स्वसविधवसतीन् भूमिपालो विदध्यात् ।।२६७।।

देशः कालश् च कृत्यं भवतु विनियतं राजगेहे समेषां
भृत्यानां, साऽवधाना विदधतु च यथादेशकालं कृतीस् ते।
आप्तैर् भृत्यैः प्रवीणैः सततमवहितै रक्षितं यस्य गेहं,
तस्मिन् बद्धाऽनुरागा भवति नरपतौ राजलक्ष्मीश् चिराय ।।२६८।।

समेषाम् = सर्वेषाम्

सैनिकाः प्रजाश् च परोपजापसहा न भवेयुर् इति राजा चिन्तयेत्

मूलपाठः

राजाको चतुराई भया सिपाही रैति हात गरि राख्नु. कसैको मलाजापछि गुणपछी लाग्नु नदिनु. नुनपछि लाउनु.

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतच्छाया

चतुरो राजा सैनिकान् प्रजाश् च रञ्जयतु । परेषाम् उपजापं ते न शृणुयुः, भर्तृपिण्डस्य प्रत्युपकारपराश् ते भवेयुर् इति राजा चिन्तयेत् ।

पद्यमयी व्याख्या

लोकानां सैनिकानाम् अपि धरणिपतिश् चित्तवृत्तीः परीक्ष्य
कुर्यात् तद्रञ्जनाय प्रणिहितहृदयः सर्वदैव प्रयत्नान् ।
लोकश् चक्राणि, यन्ता धरणिपरिवृढः, सैनिकाः सन्ति वाहा,
राज्याऽख्यः कश्चिदास्ते रथ, इति मतिमांश् चिन्तयेद् भूमिपालः ॥२६९॥

स्वीयाः सैन्याः प्रजाश् च क्वचन न शृणुयुर् वैरिवर्गोपजापान्,
राजद्वारे रणे च प्रभुहितविधये ते सदा सन्तु सक्ताः ।
विद्रोहो जातु मा भूत् क्वचन जनपदे स्वे भटानां प्रजानाम्,
इत्थं संचिन्त्य राजा विरचयतु च तद्रञ्जनाय प्रयत्नान् ॥२७०॥

शुद्धरजयतमयं रूप्यकं विधेयम्

मूलपाठः

उप्रान्त टक्सार पनि चोखो चलाउनु.

संस्कृतच्छाया

अथ टङ्कशालायां शुद्धा एव मुद्राः कार्याः ।

पद्यमयी व्याख्या

भूपाला मल्लवंश्या विलसनविषयैर् नाट्यसंगीतकाऽद्यैः
साम्राज्यश्रीविलासान् मुगलकुलजनीन् अन्वकुर्वन् क्षितीशान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अल्पाऽया मल्लभूपा व्ययविपुलतया रिक्तकोषत्वमाप्य
चिन्ताग्रस्ता बभूवुर् निजजनभरणे प्रत्यहं संविधेये ।।२७१।।

क्षेत्रं विक्रीणते स्म व्यवहृतिविधये क्षीणकोषाः क्षितीशाः,
पूर्वे मल्ला नृपाला अपि धनरहितास् तत् तथा कुर्वते स्म ।
अन्त्या मल्ला नृपालाः प्रतिदिवसमिव क्षीयमाणप्रदेशाः
क्षेत्रं विक्रेतुकामाः स्वहृदभिलषितान् ग्राहकान् नाऽलभन्त ।।२७२।।

अन्तर्भूयिष्ठताम्राः सुविहितरजताऽऽलेपसंछादिताऽङ्गास्
ते भूपाः क्षीणकोशा जननयनमुषोऽकारयन् कूटमुद्राः ।
मुद्राभी राजतीभिर् हठकृतसमतास् ताम्रजाः कूटमुद्राः
स्वीकुर्वन्ति स्म लोका निजजनपदजा राजभीत्या कथञ्चित् ।।२७३।।

आनीयन्ते पदार्थाः परजनपदतो भूरि कष्टं विषह्य,
शुद्धं रूप्यं सुवर्णं किमुत नियमतस् तत्र मूल्यं प्रदेयम् ।
मुद्राभिस् ताम्रजाभिः कथमिव समतां हेमरूप्ये वहेताम्,
इत्युक्त्वा सार्थवाहा निरुरुधुरखिलां बाह्यपण्या वणिज्याम् ।।२७४।।

बाह्यपण्याः = बाह्यं बहिर्देशे भवं पण्यं विक्रेयं वस्तु येषां ते

ताम्राऽर्घो रूप्यमूल्याद् भवति लघुतरस्, तेन लाभस्य हेतोः
शिल्पज्ञाः कूटकारा अकृषत बहुलास् ताम्रजाः कूटमुद्राः ।
भूपालैः कार्यमाणा इव निपुणतरैः शिल्पिभी रच्यमाना
भूयस्यः कूटमुद्रा अजनिषत, भिदा काऽपि नाऽभूत् तदीया ।।२७५।।

मन्दं मन्दं विलोपं रजतविरचिताः शुद्धमुद्रा अगच्छन्,
भूयिष्ठाः कूटमुद्राः प्रतिदिनमभवन् वर्धमानाः क्रमेण,।
भोज्यं वस्त्रं मनुष्यस्थितिकरमभवद् मूल्यवृद्ध्या दुरापं,
दैन्यं व्याप्नोत् प्रजानां हृदयमतितरां, तोष आसीद् विलीनः ।।२७६।।

CC-0. Nepal Sanskrit Academy, Kathmandu

आस्ते लोके महाऽऽर्घः, शिशुजनबहुला आस्महे, वेतनेन
स्वल्पेनाऽनेन कृत्यं कथमिव गृहजं प्रत्यहं साधनीयम् ।
अस्माकं वेतनं स्यात् समयसमुचितं, येन जीवेम राजन्-
नित्थं भृत्याः पुराणा अपि नृपमवदन् पीडयन्तः प्रकामम् ।।२७७।।

प्राभूवन् मल्लवंश्या धरणिपरिवृढाः कूटमुद्रासमुत्थान्
नैतान् दोषान् निरोद्धुं कथमपि, शनकैस् तान् नृपश्रीर् अहासीत् ।
दोषव्रातोऽपगच्छेत् कथमयमिति मे दीर्घचिन्ताऽऽजनिष्ट,
मुद्राभी राजतीभिर् भवति शुभमिति प्रत्यभासीद् मतिर् मे ।।२७८।।

मुद्राभी राजतीभिः सह हि जनपदे कूटमुद्राप्रचारे
संपन्ने राजकोषक्षतिरजनि, परं नो समर्घोऽजनिष्ट ।
तस्मात् सर्वत्र राज्ये व्यधिषि दृढतया कूटमुद्रानिरोधं,
मन्दं मन्दं समर्घोऽजनि, जनपदजैः सौख्यवर्षोऽन्वभावि ।।२७९।।

यैर् धूर्तैः कूटमुद्रा व्यरचि किमुत तत्संग्रहोऽकारि भूयांस्,
तेषां हानिं महिष्ठाम् अकृत मम नयस्, तेन ते मेऽभ्यकुप्यन् ।
अस्मद्मुद्राप्रचारो भवति चिरतरात् कालतो भोटदेशे,
तत्रत्या धर्ममुख्याः कतिचन बहुलाः कूटमुद्रा अचैषुः ।।२८०।।

सर्वा मुद्रा हिरण्योरणलवणमुखैर् वस्तुभिः पण्यभूतैः
प्राप्ता अस्मत्प्रजाभिर् विनियमविधिना पूर्वकालाऽऽगतेन ।
सर्वा नेपालमुद्रा दधति सदृशतां भोटदेशेऽस्मदीये,
तस्मात् तासां विभेदोऽनुचित इति वचो भोटनाथो ब्रवीति ।।२८१।।

वार्ता अस्मिन् प्रसङ्गे व्यधिषत बहुला अस्मदीयाश् च ते च
शान्त्यर्थं, किन्तु नाऽभूद् उभयजनमतो निर्णयोऽद्याऽपि कश्चित् ।
केषाञ्चित् स्वार्थहेतोः कथमिव सकलं पीडयेम स्वराष्ट्रं,
तस्मात् कार्यः प्रयत्नः सधृति दृढतया कूटमुद्रानिरोधे ।।२८२।।

CC-0. Nepal Sanskrit Academy, Kathmandu

धर्माऽधिकरणव्यवस्था

मूलपाठः

अदालथमा पनि ठकुरि जाचि डिठ्ठा राख्नु. मगर जाचि बिचारि थापनु. कचहरिपिछे यक् यक् पण्डीत राखी निसासास्त्रबमोजिम् अदालथ चलाउनु.

संस्कृतच्छाया

परीक्षितष् ठकुरिकुलजो मनुष्यो धर्माऽधिकरणे मुख्यः प्राड्विवाको भवतु। परीक्षितो मगरकुलजो मनुष्यो मुख्यस्य प्राड्विवाकस्य मुख्यः सहायको भवतु। प्रत्येकं धर्माऽधिकरणे धर्मशास्त्रज्ञः पण्डितो नियुक्तो भवतु। धर्मशास्त्रानुसारिणी दण्डव्यवस्था राष्ट्रे भवतु।

पद्यमयी व्याख्या

उत्कोचं न ग्रहीता सुकृतरतमनाः पक्षपातं न कर्ता
साध्वाचारो मनुष्यो निजचरितबलाद् रक्षति न्याय्यमार्गम्।
न्याय्यं मार्गं प्रपन्नो व्यवहृतिनिपुणो दृष्टभूरिक्रियश् च
शुद्धो नानोपधाभिष् ठकुरिरधिकृतः प्राड्विवाको विधेयः ॥२८३॥

तद्वच् शुद्धो नियोज्यो मगरकुलभवः प्राड्विवाकः सहायो,
न्याय्यो मार्गः स्वराष्ट्रे न भवतु निहतश् चेति चिन्ता विधेया।
प्रत्येकं न्यायशाला स्मृतिविधिपटुना दृष्टलोकक्रियेण
साध्वाचारेण सम्यग् भवतु विलसिता ख्यातनाम्ना बुधेन ॥२८४॥

धर्माऽधर्मव्यवस्था स्मृतिषु सहफला श्रूयते वर्ण्यमाना,
दण्डान् दोषाऽनुसारान् अभिदधति बुधा धर्मशास्त्रप्रवीणाः।
अस्माकं प्राड्विवाकाः स्मृतिविधिपटुभिर् न्यायशालानियुक्तैर्
विज्ञैः संमन्त्र्य सम्यग् विदधतु विधिवद् दण्डनीयेषु दण्डान् ॥२८५॥

धर्माधिकरणात् समुत्थं धनं धर्म्यासु क्रियासु नियोक्तव्यम्

मूलपाठः

अदालथका पैसा दरबारभित्र नहालनु. फकीर फकिडा अतित जोगि सन्न्यासि ब्राह्मणहरु इनैलाई दक्षिना मोर्जन चलाईदिनु. उप्रेका पैसा दक्षिना चलाई धोति रुमाल चलाईदिनु. यस्व भया असत्यको दोस् लाग्दैन.

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतच्छाया

धर्मस्थीयाऽधिकरणेभ्यः कण्टकशोधनाऽधिकरणेभ्यश् च समुत्थं धनराशिं राजा स्वकोषं न प्रवेशयेत् । विभिन्नसम्प्रदायाऽऽश्रितेभ्यो योगिभ्यो ब्राह्मणेभ्यश् च तेन धनेन भोजनं दक्षिणा च देयम् । अवशिष्टेन तेन धनेन तेभ्य एवाऽन्तरीयम् उत्तरीयरूपं च वस्त्रखण्डं वितरणीयम् । इत्थम् आचरन्तं राजानम् अधर्मो न स्पृशति ।

पद्यमयी व्याख्या

लोके प्रायः समस्ता व्यवहृतिविषया अर्थमेवाऽऽश्रयन्ते,
तस्यैवाऽर्थस्य हेतोर् विदधति बहुशो मानवा दुष्कृतीश् च ।
दण्डाद् उत्थोऽर्थराशिर् नरपतिसदनं चेद् विशेल् लिप्सुरर्थी
व्याजं कश्चिद् विधाय क्षितिपतिरधिकं दण्डयेद् आढ्यमर्थम् ।।२८६।।

विद्याऽऽभ्यासं चरन्तः कतिचन सुधियस् तन्वते सद्विचारान्,
योगाऽभ्यासं चरन्तः कतिचन यतयो जानते गूढतत्त्वम् ।
स्वीयं सौख्यं त्यजन्तो गहनविषयकं तत्त्वमासेवमाना
वृत्त्या हीना जनास् ते जगति सुमतिभिः पूजनीया मनुष्यैः ।।२८७।।

वृत्त्यर्थी नाऽतितृष्णान् भुवनहितकृते सस्पृहान् सज्जनांस् तान्
सत्कर्तुं भूमिपालोऽर्हति गुरुमहितान् रक्षितुं संप्रदायान् ।
धर्मस्थीयात् समुत्थाद् द्रविणसमुदयाच् शोधनात् कण्टकानां
प्राप्ताच् च द्रव्यराशेर् वितरतु नृपतिर् भोज्यवस्त्रे हि तेभ्यः ।।२८८।।

रागं द्वेषं विमुञ्चन् नियममनुसरन् संत्यजन् पक्षपातं
साकं सभ्यैः सभायां व्यवहृतिविषयान् वीक्षते यो नृपालः ।
शुभ्रा कीर्तिस् तदीया विचरति धरणौ स्वाः प्रजा रञ्जयन्ती,
तद्हेतोः सैव कीर्तिर् विरचयतितरां शाश्वतं दिव्यधाम ।।२८९।।

दण्ड्यैर् दण्डो न लब्धः परिषदि यदि वा दण्डिता दोषहीना
राज्ञो यस्य प्रमादात्, स विशदयशसो धर्मतश् च च्यवेत ।

CC-0. Nepal Sanskrit Academy, Kathmandu

धर्मस्थीया।ऽदिलब्धं द्रविणसमुदयं पात्रसात् कारयन्तं
पृथ्वीपालं तु दोषः स्पृशति न स इति श्रूयते धर्मशास्त्रे ।।२९०।।

पात्रसात् = पात्राऽधीनम्

आकरीयाया भूमेर् ग्रामोऽपसारणीयः

मूलपाठः

खानि भयाका ठाउमा गाउ भया पनि गाउ अरु जग्गामा सारिकन पनि खानि चलाउनु.

संस्कृतच्छाया

आकरीयायां भमौ वर्तमानं ग्रामम् अप्यन्यत्राऽपसार्याऽपि खनिः प्रवर्तनीया ।

पद्यमयी व्याख्या

अन्वर्था रत्नगर्भा विलसति, वसुधा चाऽस्ति साऽर्थाऽभिधाना,
शब्दद्वन्द्वं यथार्थं विदधति कुशला आकरज्ञानभाजः ।
नानारूपाः पदार्थाः समरविषयका भूरयो लौकिकाश् च
निर्मीयन्ते पदार्थैः खनिजनिभिरतः स्याद् व्यवस्था खनीनाम् ।।२९१।।

स्थाने स्थानेऽत्र देशे कतिचन खनयः सन्ति ताम्रा।ऽदिकानां,
निस्सार्यन्ते च ताभ्यः खनिविधिकुशलैर् धातवो नेकरूपाः ।
खन्यध्यक्षः प्रवीणैः सह खनिकुशलैर् मन्त्रणां संविधाय
नूतनानाम् आकराणां भवतु विचयने सर्वदा सप्रयत्नः ।।२९२।।

विचयने = अन्वेषणे

ग्रामा।ऽद्यैः रुध्यमानाऽ।पि च धरणिरियं धातुरत्ना।ऽदिगर्भा
दृष्टेति क्ष्मापरीक्षाविधिकुशलजनाः सूचनां चेत् प्रदद्युः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भूयो भूयः परीक्षां समुचितविधिना कारयित्वा च कार्यं
तेषां ग्रामाऽदिकानाम् अपसरणमितः, सा खनिः संप्रवर्त्या ॥२९३॥

दमा = भूमिः

केदारीयाया भूमेर् गृहम् अपसारणीयम्

मूलपाठः

गह्रो बन्न्या जग्गामा घर भया पनि घर अरु जग्गामा सारि कुलो काटि खेत बनाई अबाद गर्नु.

संस्कृतच्छाया

केदारीयायां भूमौ वर्तमानं गृहम् अप्यन्यत्राऽपसार्य नवीनां कुल्यां विरचय्य केदारो रचणीयः।

पद्यमयी व्याख्या

वृत्तिच्छेदे न कश्चित् प्रभवति मनुजो रक्षितुं जीवितं स्वं,
वाणिज्यं पाशुपाल्यं कृषिरिति विदिता वृत्तयः सन्ति तिस्रः ।
वर्तन्ते सार्थवाहाः कतिचन कतिचित् सन्ति मेषाऽदिपाला
देशेऽस्मिन्नस्मदीये कृषिविधिनिरता एव सन्ति प्रभूताः ॥२९४॥

अम्भोभिः सिच्यमाना धरणिरभिमतं सस्यराशिं प्रसूते,
व्योमस्थो वाततुन्नो दिशति जलधरो वारिधारां धरित्र्यै ।
वैमुख्यं दैवयोगाच् श्रयति जलधरे कर्षकेभ्यः स्वकीयो
वर्षव्यापी प्रयत्नोऽपि च दिशति फलं निःस्वतारूपमेव ॥२९५॥

वाततुन्नः = वायुप्रेरितः

स्वीये राष्ट्रे बुभुक्षा नहि वसतु, नदीमातृकोऽस्तु स्वदेशः,
क्षेत्राऽजीवा लभन्तां श्रमफलमुचितं चेति बुद्धया नृपालः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्राचोना: सेतुबन्धाः समग्रसमुचितां संस्क्रियाम् आप्नुवन्तु,
प्रत्यग्राणां च तेषां भवतु विरचना चेति चिन्तां करोतु ।।२९६।।

प्रत्यग्राणाम् = नवीनाना

केदारं नाशयित्वा प्रभवतु न जन: कोऽपि गेहं विधातुं,
केदारीया धरित्री यदि च जनपदे गेहरुद्धा क्वचित् स्यात् ।
तद् गेहं सारणीयं क्वचिदपि धरणौ वप्रतावर्जितायां,
कृत्वा कुल्यां नवीनां गृहवलयितभू: क्षेत्रतां प्रापणीया ।।२९७।।

केदार: = वप्र: = क्षेत्रम्

विप्रलम्भ:

मूलपाठ:

उप्रान्त ।। केही वेलामा हात दिनामा पस्या र मलाई फिकाया र पछाडि दगा दिया र महायुध गरि पछाडि सुध गरि नेपाललाई मुर्चा लाञाथ्या.

संस्कृतच्छाया

अथ कदाचन ममा ।ऽनुकूलिका: सन्तो माम् आह्वयन् । परं पश्चाद् मां विप्रालभन्त । अतिकष्टेन पार्ष्णिग्राहान् अपसार्य नेपालद्रोणीदेशं न्यरुन्धि ।

पद्यमयी व्याख्या

नेपालद्रोणिदेशात् ककुभि सुरपतेर् वर्तमानान् प्रदेशांस्
तत्रत्यान् पण्यमार्गांस् तुहिनशिखरिणं संश्रितान् भोटमार्गान् ।
भूपाल: सोऽधिकुर्यात् सुखमिव, सततं नालदूमाऽभिधाने
यस्य स्युः शैलदुर्गे विहितवसतय: सैनिका जागरूका: ।।२९८।।

सुरपते: ककुभि = पूर्वस्याम्

नेपालद्रोणिभाजो धरणिपरिवृढा मल्लवंशप्रसूता
अन्योन्यं स्पर्धमाना व्यधिषत समरांस् तस्य दुर्गस्य हेतोः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मन्वानः स्वाद् विपक्षाद् धरणिपरिवृढः शक्तिहीनं स्वपक्षम्
अस्मत्पक्षं स्वपक्षे रचयितुमभजत् षड् गुणान् राजकीयान् ।।२९९।।

भक्तग्रामाऽधिपाले रणजिति नृपतौ कान्तिदेशाऽधिपेन
राज्ञा वीरेण साकं विदधति कलहं तस्य दुर्गस्य हेतोः ।
भक्तग्रामस्य पक्षं रणभुवि सुभटा गोरखीया अगृह्णन्,
कान्तोशो भङ्गमाप्नोद्, अलभत रणजिद् दुर्गमुक्तं सुखेन ।।३००।।

अस्माकं सैन्यचक्रेऽपसरति च ततो दुर्गमेतज् जिघृक्षुर्
विक्रान्तः कान्तिनाथः पुनरपि पृतनां प्रेषयामास तत्र ।
जन्ये संजायमाने नृपतिरणजितो वाहिनीं द्रावयित्वा
कान्तिक्ष्मापालसेना पुनरपि विदधे नालदूमे स्ववासम् ।।३०१।।

आस्माकी गोरखीया पुनरपि पृतना नालदूमं समेत्य
कान्तिक्ष्मापालसेनां बहिरकुरुत तद्दुर्गतो भीषयित्वा ।
भक्तग्रामाऽधिपाले लषति पुनरिदं दुर्गरत्नं ग्रहीतुं
नाऽतिष्ठेऽहं तदानीं नृपतिरणजितो दुर्बले सैन्यचक्रे ।।३०२।।

स्थेयाऽर्थे तङ्

कान्तिक्ष्मापालकेन प्रसभमपहृतौ साँखु-चाँगु-प्रदेशा-
वावाभ्यां मोचनीयौ धरणिप भवतां तौ तवैवाऽधिकारे ।
एषा वाणी मदीया नृपतिरणजितः प्रीतये जायते स्म,
कालः संभूय गन्तुं रिपुनृपतिधराम् आवयोर् निश्चितोऽभूत् ।।३०३।।

कान्तिक्ष्मापालदुर्गं वशयितुमनसः सैनिका गोरखीया
निर्णीतं देशमेवाऽभ्युपगतसमये प्राप्नुवन्नभ्यमित्र्याः ।
स्रवते मां विप्रलब्धुं रणजिति नृपतौ स्वां प्रतिज्ञां विहाय
काचित् सेना तदीया रणभुवमभजद् नैव निर्दिष्टकाले ।।३०४।।

अभ्यमित्र्याः = शत्रुं प्रति गन्तारः

CC-0. Nepal Sanskrit Academy, Kathmandu

भक्तग्रामाऽधिपालाच् श्रुतसकलकथः कान्तिदेशाऽधिपालस्
तस्मिन् दुर्गे तदानीं निजबहुपृतनां कारयामास सज्जाम् ।
मत्का स्वल्पप्रमाणा रणभुवि पृतना भङ्गमाप्नोद् महान्तं,
पार्ष्णिग्राहेभ्य आसन् विकटतरदरा गोरखामूलदुर्गे ।।३०५।।

मत्का = मदीया
दराः = भीतयः

पार्ष्णिग्राहान् समस्तान् बहुविधयतनैर् दूरतः संविधाय
सोढ्वा सोढ्वाऽतिकष्टं पुनरपि नयने प्राक्षिपं मल्लराज्ये ।
गुल्मानां संनिवेशं समुचितविधिना कारयन् सर्वमार्गान्
नेपालद्रोणिमाप्तॄन् सबलपृतनया सर्वतोऽहं न्यरुन्धि ।।३०६।।

नागानां (योगिब्रुवस्य सैनिकानां) विनिपातः

मूलपाठः

जयप्रकास मल्लका मतलप्लाई दषिनबाट नागा झिकाया र नेपालभित्र पस्न नदि सातगाउभित्रंमा भिजाजां.

संस्कृतच्छाया

मल्लवंश्यस्य जयप्रकाशस्य नृपतेः सहायतायै दक्षिणस्या दिशो (भारताद्) नागान् आह्वयन् ।
नेपालद्रोणीम् अप्रविशत एव तान् अहं सप्तसु ग्रामेषु भूमिवर्धनान् अकरवम् ।

पद्यमयी व्याख्या

आस्ते गोरक्षनाथो जगति सुविदितो योगिराजाऽधिराजः,
सोऽस्माकं देशमेतं श्रयति करुणया भक्तसिद्धिप्रदायी ।
नाम्ना तस्याऽस्मदीयो वहति जनपदश् चैष गोरक्षनाम,
चित्ते तं शुद्धभक्त्या स्वकुलसुमनसं सर्वदा भावयामि ।।३०७।।

स्वकुलसुमनसम् = निजकुलदेवताम्

CC-0. Nepal Sanskrit Academy, Kathmandu

तत्संबन्धाद् ममाऽस्ते यतिजनविषया निर्मला भक्तिधारा,
साकं मे ख्यातनाम्ना समजनि यतिना संगमो दैवयोगाद् ।
उत्साहं मामकीनं समरविषयकं संनिशम्याऽऽदरेण
मह्यं प्रादात् स योगी प्रकटितसुमना आशिषोऽनेकरूपाः ।।३०८।।

प्रज्ञायां तिष्ठमानः, समरभुवि परं दर्शयन् साहसं स्वं,
कुर्वाणः स्वप्रजानां हितमधिकमिलां भासयन् स्वीयकीर्त्या ।
जित्वा माकन्ददेशं तदुदितवसुना वाहिनीं वर्धयन् स्वां
नेपालद्रोणिदेशं सबलपृतनया सर्वतोऽहं न्यरुन्धि ।।३०९।।

प्रज्ञायां तिष्ठमानः = बुद्धि स्थैर्यतया समाश्रयन्
इलाम् = पृथिवीम्
वसुना = धनेन
वाहिनी = पृतना = सेना

त्वत्सिद्ध्यर्थं करोमि व्रतनियमरतो देवताऽऽराधनानि,
मद्दत्ताऽशीःप्रभावात् समरभुवि रिपून् ईशिषे त्वं विजेतुम् ।
एतावद् राज्यमाप्नोः, प्रतिदिनमिव ते विस्तृतिं राज्यमेति,
मह्यं राज्यांऽशमेकं वितरितुमपि ते वर्तते काल एषः ।।३१०।।

ईशिषे = समर्थोऽसि

प्रावोचं विस्मितः सन् यतिवरगदितां वाचमेतां निशम्य,
कोऽर्थो राज्येन साध्यो भवति यतिपतेर् मुक्तिमार्गं प्रपित्सोः ।
राष्ट्रस्यैक्यं विधातुं निशमपि दिवसीकृत्य यत्नं करोमि,
संयुक्तं राष्ट्रमेतद् विघटयितुमथ स्यां कथं सोऽहमीशः ।।३११।।

प्रपित्सोः = प्राप्तुम् इच्छोः
ईशः = समर्थः

श्रुत्वेदं मामकीनं प्रतिवचनमतिक्रोधसंदीप्तचेताश्
चक्रे योगिब्रुवोऽसौ सह नरपतिभिर् मल्लवंश्यैः सखित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आगच्छद् योगिसेना प्रहरणबहुला भारताद्, मामकीनैः
सप्तग्रामेषु योधं रणशिरसि हता साऽभजत् प्रेतलोकम् ।।३१२।।

योगिव्रवः = अयोगिनम् अपि आत्मानं योगी इति ब्रुवाणः

मीरकासिमस्य पराजयः

मूलपाठः

काश्मेरिषान् नवाफ् मकवानपुरमा चढ्यो र छत्र्अबिस् षो(घो) डाले काटि घर्काई सिवाना कटाई आजां

संस्कृतच्छाया

कासिमअलीखाँनामको वङ्गराजो माकन्ददेशपर्वतम् आरोहत् । विशेन शतेनाऽश्ववारैस् तं विजित्याऽनुद्रुत्य च स्वराज्यसीमाया बहिर् अकरवम् ।

पद्यमयी व्याख्या

माकन्दक्ष्माऽधिपालो व्यवहृतिनिपुणो हेमकर्णाऽभिधानः
पाणिग्राहः स्वपुत्र्या इति मयि सरसां दर्शयन् बाह्यवृत्तिम् ।
यावज्जीवं न वैरं स्फुटतरमभजत्, स्वर्गलोकं प्रयाते
ताते दिग्बन्धनोऽभूद् धरणिपरिवृढो हेमकर्णस्य सूनुः ।।३१३।।

स्वपुत्र्याः पाणिग्राहः = जामाता

नव्यो माकन्दराजः सह मम रिपुभिः सख्यबन्धं वितन्वन्-
नुद्योगं मामकीनं विफलयितुमपि स्वाम् उपायुङक्त शक्तिम् ।
माकन्दक्षोणिनाथं वशयितुमभवन् सोद्यमा गोरखीया,
युद्ध्वा कञ्चित् स कालं नरपतिरभवत् क्वाऽपि दूरे विलीनः ।।३१४।।

नव्यो माकन्दराजः = दिग्बन्धनसेनः

CC-0. Nepal Sanskrit Academy, Kathmandu

माकन्देशस्य हर्म्यं व्यतनुत रुचिरं गोरखावैजयन्ती,
याम्या सोमाऽस्मदीया मुगलनरपतेर् अस्पृशत् सौम्यसीमाम् ।
सस्यैर् आढ्यां धरित्रीं वनमपि विविधैर् वस्तुभिर् हस्तिभिश् च
संपन्नं प्राप्य लक्ष्मीर् विकसितवदना गोरखीयाऽभवच् च ।।३१५।।

माकन्देशस्य हर्म्यम् = मकवानपुरराजस्य प्रासादम्
गोरखावैजयन्ती = गोरखाराजस्य ध्वजः

आस्तां दण्डोऽस्मदीयो दृढबलसहितः स्थायिताम् आददानो,
ध्यात्वैतत् सैन्यवर्गाः कतिचन विहिता नूतनं कोषमाप्य ।
हिन्दूनां सैन्यशक्तिः पुनरपि च नवं जीवनं प्राप्तुकामा
सम्पन्नेति प्रभूतां क्रुधमपि दधतो म्लेच्छवर्ग्या अभूवन् ।।३१६।।

स्वामिनं स्वकपटेन सिराज वङ्गनायकमपास्य सिताऽस्यम् ।
तोषयन् धनचयेन बलेशो मीरजाफर इलापतिरास ।।३१७।।

सिताऽस्यम् = गौरमुखम् = आङ्ग्लम्
बलेशः = सेनापतिः
इलापतिः = राजा

मीरजाफरमपास्य तथैव मीरकासिम इलापतिरास ।
वङ्गभूमिरभवद् गतलक्ष्मीस्, तच्छ्रियं सितमुखा अलभन्त ।।३१८।।

गौराऽस्याः सार्थवाहाः कनकसमुदयं शीघ्रमेवाऽर्जयित्वा
स्वं देशं गन्तुमैच्छन्, जगति सुविदिताऽऽसीद् धनाया तदीया ।
वङ्गक्ष्मापालपीठेऽपि च निजमनुजं ते निधातुं समर्थाः
शुल्काऽदानेन भूपं प्रकृतिमतितरां स्वैरमूल्यैर् अदुन्वन् ।।३१९।।

धनाया = लोभः
स्वैरमूल्यैः = स्वैर् अभिमतैर् मूल्यैः
अदुन्वन् = अपीडयन्

CC-0. Nepal Sanskrit Academy, Kathmandu

बाह्याद् देशाद् उपेताः कतिचन वणिजो भूमिपालं प्रजाश् च
प्रत्यक्षं पीडयन्तोऽपि च विगतभयाः संचरन्तीति खिन्नः ।
अत्याचारं निरोद्धुं प्रयतनमकरोत् कासिमो वङ्गनाथः,
स्वीयो लाभोऽपगच्छेद् इति सितवदनाश् चुक्रुधुः कासिमाय ।।३२०।।

मीरजाफर उपैतु नृपत्वं, भूय एष वितनोतु हितं नः ।
कासिमः पततु भूपतिपीठाद्, भावमेतमदधुश् च सितास्याः ।।३२१।।

दुर्लङ्घ्ये क्वाऽपि शैले दृढतरघटितं दुर्गमस्तु स्वकीयम्,
आपत्तौ दुर्गमेतद् भवतु शरणदं दुर्ग्रहं द्विड्ध्वजिन्या ।
दुर्गं संश्रित्य चैतत् सितमुखपृतनां युद्धभूमौ विजित्य
वङ्गेशो निःसपत्नो भवितुमतितरां कासिमो वाञ्छति स्म ।।३२२।।

द्विड्ध्वजिन्या = शत्रुसेनया
सितमुखपृतनाम् = आङ्ग्लसेनाम्

लब्धे भङ्गे समीकेऽनुभवति हृदये क्रोधमात्रं प्रकामं,
स्वस्माद् अस्माद् उपायात् प्रभवति कतमोऽपाय एतद् विवेक्तुम् ।
नो शक्ता दुर्विनीताः कतिचन पुरुषा भूपदिग्बन्धनस्य
प्रोचुर् गोरक्षरन्ध्रं यवननरपतिं कासिमं वङ्गनाथम् ।।३२३।।

समीके = युद्धे

श्रुत्वा वृत्तान्तमेतं प्रमुदितहृदयः कासिमो हैमकर्णिं
लब्ध्वा सोपानरूपं तुहिनशिखरिणं रोद्धुकामो बभूव ।
नेपालं जेतुमिच्छोर् घटितबहुबला वाहिनी वङ्गभर्तुः
स्कन्धावारं स्वकीयं सुखमिव निदधे प्राप्य माकन्दभूमिम् ।।३२४।।

हैमकर्णिम् = हेमकर्णस्य पुत्रं दिग्बन्धनम्

CC-0. Nepal Sanskrit Academy, Kathmandu

संनद्धैः सांयुगीनैर् यवननृपचमूर् गोरखीयैर् हठेना-
ऽऽक्रान्ता क्षीणत्वमाप्तोद् भयचकितमनाः कान्दिशीकी बभूव ।
आस्माका अश्ववाराः खभुजशशि१२० मिता अन्वगुर् म्लेच्छसेनाम्,
आयुः स्वं त्रातुकामा द्रुततरचरणा प्राद्रवत् सा सुदूरम् ।।३२५।।

कान्दिशीकी = भयेन पलायिता

भङ्गं लब्ध्वा निवृत्ते महति निजबले कासिमोऽभूद् निराशस्,
तत्साहाय्येन लिप्सोर् निजपदमगमद् हैमकर्णर् दुराशा ।
अस्मत्सैन्यैर् गृहीते समिति गृहजने तद्वियोगव्यथाऽऽर्त्तः
कान्तासौख्यं समीप्सुः स्वयमभजत मे मन्दिरं हैमकर्णिः ।।३२६।।

समिति = युद्धे

आङ्ग्लानां पराजयः

मूलपाठः

तिन चार पल्टन् लिएर सिडुलि गढिमा हांडोसाहेब चढ्यो र वा वाहो पनि, काटि पथर्काला च्याति ल्याउ्या र

संस्कृतच्छाया

त्रिचतुराणि सहस्राणि सैनिकान् आदाय हाँडिनामक आङ्ग्लसेनापतिः सिँधुलिदुर्गम् आरोहत् । तम् अपि विजित्य वह्निशस्त्राणि प्रसभम् अपाहरम् ।

पद्यमयी व्याख्या

नेपाले भोटदेशेऽपि च सितवदनाः पण्यवृत्त्या चरन्तः
प्रत्यब्दं स्वीयदेशं कनकसमुदयं नेतुमीशा बभूवुः ।
संपूर्णे शैलराजे सति निजवशगे स्वर्णराशिं यथेच्छं
संचेतुं स्याम शक्ता इति तुहिनगिरिं जेतुमाङ्ग्ला ववाञ्छुः ।।३२७।।

सितवदनाः = आङ्ग्लाः
शैलराजः = तुहिनगिरिः = हिमालयः
स्याम = भवेम

CC-0. Nepal Sanskrit Academy, Kathmandu

गौरा।ऽस्याः सार्थवाहा विधृतपरिकराः शैलराजं विजेतुं
जिज्ञासाञ्चक्रिरे तद्गिरिपथसरितो राजकीयं च वृत्तम् ।
धर्मा।ऽचार्यस्वरूपाः कतिचन, कतिचिद् विज्ञवैद्यस्वरूपा,
आजग्मुर् गौरवक्त्रा नवतरकुतुकं रञ्जयन्तो मनुष्यान् ।।३२८।।

क्षुद्रे राज्ये प्रभुत्वं मनसि च नितरां क्षुद्रभावं दधाना
दूरं द्रष्टुं न शेकुस् तुहिनगिरितलं शासतो भूमिपालाः ।
तान् भूपान् रञ्जयन्तो निजचतुरतया तद्रहस्यं च बुद्ध्वा
चारा निश्चिक्युरेते तुहिनशिखरिणो जय्यताया उपायम् ।।३२९।।

जय्यतायाः = जेतुं शक्यतायाः

कस्मिंश्चिद् भूमिपाले निजचरनयनैर् दुश्चरित्रं तदीयं
ज्ञात्वा राज्यात् स्वकीयाद् अपनयति चरान् गौरवक्त्रान् प्रसह्य ।
तत्प्रत्यर्थी समीपो नरपतिरपरो गौरवक्त्रोपहारैस्
तुष्टः स्तुत्या च तेभ्यो निजभुवि वसतिं सा।ऽदरं यच्छति स्म ।।३३०।।

कुर्वन्त्यः स्वीयकृत्या नियममनुगताः स्वप्रजाः प्राप्नुवन्तु
भोज्यं वस्त्रं च वासं, भयरहितहृदः सन्तु ताः कर्मनिष्ठाः ।
संप्राप्ता आधमर्ण्यं धनिकहृतपशुक्षेत्रगेहा।ऽदिकास् ता
दैन्यव्याप्ता बुभुक्षाविकलपरिजना न त्यजन्तु स्वदेशम् ।।३३१।।

एतां चिन्तां दधाने मयि नृपतिनयं सेवमाने रसेन
प्राज्या लोका अभूवन् मदनुसृतिपरा बिभ्रतो मत्सखित्वम् ।
लब्ध्वाकारान् अनेकांस् तुहिनशिखरिणं संश्रितान् भूमिभागान्
एकीकर्तुं प्रसक्तोऽभजत च फलितां प्रत्यहं मत्प्रयत्नः ।।३३२।।

वाणिज्या।ऽख्यं यथेच्छं जनधनहरणं तस्करत्वं चरन्तो
धूर्ता मर्त्या अभूवन् कतिचन विकला मद्नये द्योतमाने ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रत्यब्दं शैलराजात् करमिव कनकं स्वीयदेशं नयन्तो
गौरा।ऽस्याः सार्थवाहा अधिषत हृदयैः कृष्णताम् आननैश् च ।।३३३।।

अन्तःसंघर्षशीला लघुतरविषया एकतावर्जितत्वात्
क्षुद्रत्वाच् च स्वकीयां जननभुवममी रक्षितुं शक्नुयुर् न ।
इत्याकारं विचारं वहति रिपुरतः शैलराजं जिगीषुर्
गौरा।ऽस्यो मत्प्रयत्नं कथमिव सुदृशा वीक्षितुं स्यात् समर्थः ।।३३४।।

उद्योगं मामकीनं सकलमपि वृथा कर्तुकामाः सिता।ऽस्या
लोकाः स्युर् मद्विरोधे बहव इति धिया दुर्यशो मे व्यतन्वन् ।
ते धूर्ताः सार्थवाहाः परजनपदजा अस्मदीयं रहस्यं
ज्ञातुं न स्युः समर्था इति निजविषये तत्प्रवेशं न्यरुन्धि ।।३३५।।

व्याचक्षाणाः सुमार्गं सुकृतविधिमपि क्रैस्तवा।ऽख्यं चरन्तो
वर्तन्ते योगिनोऽमी इति सितयतिनां न प्रवेशं न्यषेधम् ।
किन्त्वेते लब्धरन्ध्राः सह मम रिपुभिर् बद्धसख्या मदीयं
वृत्तान्तं मां जिघांसोः सितवदनपतेः प्रापयन्ति स्म कर्णम् ।।३३६।।

सितयतिनाम् =गौराणां योगिनाम् = क्रैस्तवधर्मा।ऽचार्याणाम्

आसीत् सेना विशाला मुगलकुलभवा, साम्प्रतं सा विशीर्णा,
दीर्घा साम्राज्यसीमा प्रतिदिनमधुना सेवते लाघवं च ।
क्षीणेऽप्येवं प्रभावे कुलभवमहिमा यस्य जागर्ति लोके,
तद्माहात्म्याद् वरेण्यं वहति च भुवि यो भारतेशाऽभिधानाम् ।।३३७।।

साक्षात् सोऽयं प्रसिद्धो मुगलकुलजनी राजराजाऽधिराजो
भर्त्रा बङ्गालभूमेर् अवधनृपतिना चैव संभूय योद्धुम् ।
आगच्छद्, भूमिपालत्रितयसमुदिता वाहिनी सा विशाला
जिग्ये लघ्वाऽ।पि चम्वा सितवदनपतेर् बक्सरे युद्धभूमौ ।।३३८।।

CC-0. Nepal Sanskrit Academy, Kathmandu

सोऽयं राजाऽधिराजो मुगलकुलजनिर् बक्सरे भङ्गमाप्य
लिप्सुर् गौरा।ऽस्यसख्यं क्षतकुलविभवं तत्प्रसादं ववाञ्छ।
सामन्तत्वं विशिष्टं मुगलकुलपतिर् गौरवक्त्राय दत्त्वा
स्वीचक्रे तत्प्रभुत्वं नतमलिनमुखो वङ्गदेशे विहारे ।।३३९।।

लब्धे राज्याऽधिकारे सितमुखपतिना वङ्गदेशे विहारे
याम्या सीमा।ऽस्मदीया समगत सहसा सौम्यया तस्य सीम्ना।
अस्मद्देशं विविक्षुः सितवदनपतिः सार्थवाहाऽधिराजो
मां न्यक्कर्तुं प्रसवतोऽवसरमुपगतं संमुखं वीक्षते स्म ।।३४०।।

याम्या = दक्षिणा
सौम्यया = उत्तरया
समगत = समगच्छत = संयुक्ता भवति स्म

मल्लानां भूमिपानां हितमिव विदधद् न्यायवादिस्वरूपं
धृत्वा गौरा।ऽननेशोऽकुरुत मम कृते न्याय्यमार्गोपदेशम्।
बुद्ध्वा तद्गूढभावं मयि नयसरणिं पूर्ववत् सेवमाने
नेपालं स्वं विधित्सुः सितवदनपतिः प्रेषयामास सेनाम् ।।३४१।।

चूरेर् अद्रेर् अवाचो न भवति धरणिः सांयुगीनेति, सेना
शत्रोर् मार्गं रुरुत्सुः सिंधुलिपरिसरे गोरखीया न्यबात्सीत्।
संप्राप्तायां ध्वजिन्यां सितवदनपतेस् तत्र संग्राम आसीत्,
लब्ध्वा भङ्गं महान्तं भयचकितमनाः प्राद्रवच् शत्रुसेना ।।३४२।।

अवाची = दाक्षिणात्या
सांयुगीना = रणे साधुः
रुरुत्सुः = रोद्धुम् इच्छुः
ध्वजिन्याम् = सेनायाम्

स्वप्राणाँस् त्रातुकामा द्रुततरगतयो गौरवक्त्रस्य सैन्याः
स्वीयानाम् आयुधानाम् अवनमपि तदा नाऽभवन् कर्तुमीशाः।

CC-0. Nepal Sanskrit Academy, Kathmandu

निघ्नन्तः शत्रुसैन्यान् प्रहरणनिकरं वह्निशस्त्रप्रधानं
शत्रूणाम् आददाना रणभुवि सुभटा गोरखीया अनन्दन् ।।३४३।।

अवनम् = रक्षणम्
ईशाः = समर्थाः

तिलङ्गानामा सैनिकवर्गः

मूलपाठः

लषनैबाट तिन् मुसल्मां मेरो चाकरिलाई नुवाकोटमा पिछा परि आयाका थिया. ईनै बन्दुकको तुलकलायेत तिनै मुसल्मानले जान्याको रहेछ र सेषजरवर ममतकि भेषासिं तिनै जनालाई अजिटनी दिया र तिलंगा सघायाको हो.

संस्कृतच्छाया

वह्नयस्त्राणां (बन्दुक) रचनां प्रयोगंच जानन्तः शेखजरवरः ममतकिः भेखासिंङः इति नामानि दधानास् त्रयो मुसलमाना लखनउप्रदेशाद् वृत्तिकामा नुवाकोटे माम् अभ्यागच्छन् । तेभ्योऽहं सेनापतिसहायक इति पदम् अददाम् । ते गोरखीयान् सैनिकान् वह्निशस्त्रक्रियायां व्यनयन् । ततस् तिलङ्गानामा गोरखीयः सैन्यवर्ग उदपद्यत ।

पद्यमयी व्याख्या

वह्नयस्त्रज्ञानभाजो मुसलिमकुलजाः सांयुगीनास् त्रिसंख्या
आगच्छन् वृत्तिकामा लखनउनगराद् मां नुवाकोटदुर्गे ।
ते सैन्यान् गोरखीयान् व्यधिषत निपुणान् वह्निशस्त्रप्रयोगे,
नूतनस् तैलिङ्गनामाऽलभत जनिमथो सैन्यवर्गोऽस्मदीयः ।।३४४।।

नेपालद्रोण्यां मुगलभूपो जेष्यतीति लोकप्रवादः

मूलपाठः

नेपालको किताब ह(हे)र्दा तुर्कांना मंग्रात् मुगलाना हुन्या रहेछ र तुर्काना अघि भंगयेछ.

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतच्छाया

नेपालद्रोणी तुरुष्कभूपतिभोग्या मगरभूपतिभोग्या मुगलभूपतिभोग्या च भविष्यतीति वृत्तान्तो नेपालद्रोणीवर्णनात्मके निबन्धे दृश्यते । नेपालद्रोणी तुरुष्कभूपतिभुक्ता बभूव च ।

पद्यमयी व्याख्या

भावी भूपस् तुरुष्काऽभिधयवनकुले लब्धजन्मा हठेन
नेपालद्रोणिनाथस्, तदनु मगरभूपालकस् तां विजेता ।
कर्ता पश्चाद् महीं तां मुगलकुलभवः सार्वभौमः स्वकीयाम्,
इत्यास्ते बद्धलेखा प्रतिजनवदनं संचरन्ती कथाऽत्र ।।३४५।।

जातो वंशे तुरुष्के मुहमदसमये दीक्षितो वङ्गनाथः
सार्धं सैन्यैः स्वकीयैर् घटितबहुबलो देशमेतं प्रपेदे ।
लीने देशाऽधिनाथे निहतबहुजनो देवतामन्दिराणि
दग्ध्वा हृत्वा यथेच्छं सपदि निववृते नीवृतं स्वं जयी सः ।।३४६।।

मुहमद्‌समये दीक्षितः =मुसलमानानां मतस्य प्रवर्तकेन निर्दिष्टस्य धर्मस्याऽनुयायी
एतं देशम् = नेपालद्रोणीम्
देशाऽधिनाथे लीने = नेपालद्रोणीपालके कुत्राऽपि पलायिते
स्वं नीवृतम् = निजं देशम्

मुगलैः करिष्यमाणस्य विजयस्य निरोधस्योपायः

मूलपाठः

मगरात्‌को राजा मैं हुं. मुगलानाको दोष मेटनालाई आधा थुम मेटि कंपनी जमायाको हो. आधा षुडा भाघा पथरकाला बनायाको हो.

संस्कृतच्छाया

मगरभूमिराजोऽहम् एवाऽस्मि । मुगलानां विजयं निरोद्धुं प्राचीनायाःसैन्य व्यवस्थाया अर्धं परिवर्त्य वह्निशस्त्रयोधिनः सैन्यवर्गा व्यरच्यन्त । अत एवाऽस्माकं सेनाया अर्धम् इदानीं खड्ग–योधि तथाऽन्यद् अर्धं वह्निशस्त्रयोधि वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पद्यमयी व्याख्या

अस्मिन् कालेऽहमासे मगरधरणिपश्, चण्डिकाऽनुग्रहेण
नेपालद्रोणिदेशोऽपि च मम वशगः साम्प्रतं जात आस्ते ।
अस्मच्छक्तिर् ह्रसेच् चेद् मुगलकुलबलं भूमिमेताम् उपेयाद्,
आगच्छेद् दुर्दशा सा पुनरपि च, पुरा यां तुरुष्कश् चकार ।।३४७।।

दूराच् शत्रून् निहन्तुं प्रभवति सुभटो वह्निशस्त्रं दधान,
आसन्नान् हन्तुमीष्टे समरभुवि परान् खड्गपाणिः सुयोधः ।
प्रावीण्यं युद्धनिष्ठं भजतु बहुविधं स्वीयसेनेति चिन्त्यम्
अस्माभिर् वा विषह्याः पशुभिरिव सदा म्लेच्छपादप्रहाराः।।३४८।।

अर्धं चाऽस्मद्ध्वजिन्या विरचितमधुना वह्निशस्त्रेण योद्धुं
सम्यग् दक्षं, तथाऽऽस्ते बलदलमपरं पूर्ववत् खड्गयोधि ।
एषा सैन्यव्यवस्था मुगलकुलभवं प्रत्यवायं विनाश्य
शत्रून् विद्राव्य युद्धे प्रभवति नियतं देशरक्षां विधातुम् ।।३४९।।

सैन्यव्यवस्था

मूलपाठः

सहे नालका कम्पनिले छरितो हुन्छ र यस्व मया सये नालका कम्पनिले हजार जबानलाई पाउछ. किल्ला किल्लापिच्छे यक यक कम्पनी राषी गर्षा बांडिदिनु र जगेरा बांधी भरि राष्नु.

संस्कृतच्छाया

भटशतकमयः सैनिकवर्गः शीघ्रो भवति । अत एव भटशतकमयः सैनिकवर्गो भटसहस्रमयेन सैनिकवर्गेण सहाऽपि योद्धुं प्रभवति । प्रतिदुर्गम् एकैकः सैनिकवर्गो नियतवासो विधेयः । सैनिकानां वृत्त्यर्थं भूमिर् नियोज्या । अवशिष्टो धान्यराशिर् मित्वा रक्षणीयः ।

पद्यमयी व्याख्या

अस्माकं राष्ट्ररक्षां विदधति गिरयः प्रांशवो दुर्गरूपास्,
तस्माद् अस्मद्ध्वजिन्या भवतु विरचना शैलदुर्गाऽनुकूला ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वर्गो वह्न्यस्त्रयोधी भटशतकमयः शत्रुवर्गेण साकं
साहस्रेणाऽपि योद्धुं शिखरिरणमुखे शक्तिभाग् बोभवीति ।।३५०।।

प्रांशवः = उच्चाः
साहस्रेण = सहस्रसंमितभटशालिना
शिखरिरणमुखे = पर्वतयुद्धे
बोभवीति = नितरां भवति

यावद्दुर्गं च राष्ट्रे नवविधिघटितो वर्ग एकैक आस्ताम्,
एषा नव्या व्यवस्था भटजनबहुलाऽऽपेक्षते द्रव्यराशिम् ।
अस्मद्द्रव्यव्यवस्थाऽऽश्रयति कृषिफलं, भूमिनिष्ठं तदास्ते,
तस्माद् अस्माकमादौ भवतु सुविहिता भूमिनिष्ठा व्यवस्था ।।३५१।।

यावद्दुर्गम् = यावन्ति दुर्गाणि संभवन्ति

आस्ते क्षेत्रप्रमाणं कियदथ कियतः कस्य बीजस्य वाप,
उत्पत्तिर् धान्यराशेर् भवति च कियतः कीदृशस्याऽत्र चेति ।
आदौ कार्या परीक्षा कृषिधरणिगता, सैनिका वृत्तिभाजो
वर्तन्तां चेति तेभ्यः समुचितविधिना सा धरित्री विभाज्या ।।३५२।।

वृत्त्यर्थं सैनिकेभ्यः समुचितविधिना क्षेत्रजातं विभज्य
शेषे क्षेत्रे प्रजातो भवतु नरपतेः कोषभाग् धान्यराशिः ।
आस्ताम् आपच्छरण्यो बहुजनहितकृत् कोष्ठभाग् धान्यराशिर्,
नूत्नेनाऽस्तां पुराणो विहितविनिमयः संचितो धान्यराशिः ।।३५३।।

तिरोजनपदस्य तौर्यत्रिकस्य बहिष्कारः

मूलपाठः

उप्रान्त ।। मलाई यवटा कुराका संध्यह लागिरहेछ. कुन्कुरो भन्या मुगलाना नजिकै रहेछ. तेस् जग्गामा छोकडा पत्रीया रह्याछन्. चित्रकार भन्याको कोठामा ढोलक् सितार राग तान्मा भुल्नन्. राग तान्मा बडो ठुलो मोहो हुन्छ र दवलथ पनि षोलिन्छ. देसको भेद पनि तिनैले लैजान्छन् र हरिपले दगा गर्छ. रागको अभ्यास् पनि कसैले

CC-0. Nepal Sanskrit Academy, Kathmandu

मगनुं. तिम जातलाई पाहाड आम्फदरफ् पनि कसैले नषोल्नु. अथवा फागुलाई यक् दुई गरी झिकि चाडै बिदा गराईदिनु र देसको भेद पनि पाउदैनन्. आफ्ना स्वषसयलेलाई ता सास्त्रबमोजिम्को तिनै संहर नेपालको नेवारहरुको नाच झिकाई हेर्‍या पनि हुन्छ. ईनमा ता दियाको पनि आफ्नै देसमा रहन्छ. यस्व भया आफ्नु देस गमन् रहन्छ ॥

संस्कृतच्छाया

अथैकेन विषयेणाऽहं चिन्ताऽऽकुलोऽस्मि । मुगलैर् भुज्यमाना धरणिर् अस्मद्राज्यात् समीपा वर्तते । तत्र विटा रूपाजीवाश् च वर्तन्ते । सचित्रे वासाऽगारे मुरजवीणामधुरस्वरेणाऽस्माकं जना मुह्येयुः । संगीतस्वरोऽत्यन्ताऽऽकर्षको भवति । स्वराष्ट्रजं द्रव्यम् अपि बहिर् गच्छति ।

बाह्यास् तौर्यत्रिकज्ञा अस्मद्राष्ट्रस्य गोप्यां कथाम् अपि बहिर् नयन्ति, शत्रुर् हन्तुं प्रभवति । अस्मदीयेषु जनेषु कोऽपि संगीताऽभ्यासं न करोतु । बाह्येभ्यो जनेभ्यः स्वकीयः पार्वत्यमार्गो न दर्शनीयो नाऽपि कथनीयः।

अशक्तौ होल्युत्सवे तिरोजनपदा द्वित्रास् तौर्यत्रिकज्ञा आह्वातव्याः, शीघ्रम् एव विसर्जनीयाश् च । तथा सति तेऽस्मद्रहस्यं ज्ञातुं न प्रभवेयुः ।

स्वकीयाय विनोदाय तु नेपालद्रोण्यां प्रतिष्ठितं शास्त्रोक्तं नेवारैः क्रियमाणं नृत्यम् आहूय द्रष्टव्यम् । नेवारेभ्यो दत्तं धनम् अपि स्वराष्ट्र एव वसति । तथा सति स्वराष्ट्रं वीर्यशालि भवति ।

पद्यमयी व्याख्या

अस्मद्राज्यात् समीपं मुगलनृपतिभिर् भुज्यमानं चिराय
ख्यातं साम्राज्यमास्ते, विलसनविषयास् तत्र सन्ति प्रभूताः ।
रूपाजीवा विटाश् च प्रथितगुणकथा गुप्तचारित्रदोषा
वर्तन्ते तत्र, तेषां कतिचन कतिचिद् नः प्रजाः संस्तुवन्ति ॥३५४॥

रूपाजीवाः = वेश्याः
कतिचिद् नः प्रजाः संस्तुवन्ति = अस्माकं काश्चन प्रजाः परिचिन्वन्ति

तत्संसर्गाद् विशेयुर् विलसनविषया अस्मदीयेऽपि चित्ते,
मन्दं मन्दं भवेयुर् विलसनरसिका अस्मदीयाः जनाश् च ।
वासाऽगारे सचित्रे मुरजरवयुते रम्यवीणानिनादैस्
ते मुह्येयुर् भवेयुर् गृहजसुखपराश् चेति चिन्ताऽऽकुलोऽस्मि ॥३५५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

लोकस् तौर्यत्रिकाऽद्यैः सुमधुरविषयैर् जायते कृष्टचेता,
ज्ञाताऽस्वादो मनुष्यः प्रभवति विषयांस् तान् न हातुं समर्थः ।
नृत्यं गीतं च वाद्यं व्यसनमिति बुधैः कीर्त्यते कामजातं,
कृष्णे पक्षे शशाङ्कद्युतिरिव शनकैः क्षीयतेऽनेन कोषः ॥३५६॥

अस्मद्देशे न सन्ति प्रथितसुयशसो नर्तका गायकाश् च
तस्माद् आयान्ति केचित् परजनपदजा अत्र तौर्यत्रिकज्ञाः ।
अस्मद्देशाद् धनं ते जनपदमपरं प्रापयन्ति प्रभूतम् ,
अस्मद्रक्षाव्यवस्थाम् अपि रिपुसविधं ते जनाः प्रापयन्ति ॥३५७॥

तौर्यत्रिकज्ञाः = नृत्यगीतवाद्यज्ञाः

अस्मद्रक्षाव्यवस्थाविषयसहचरीं सूचनां प्राप्य शत्रुर्
अस्मान् आहन्तुकामो रचयति विविधान् भेदनिष्ठान् प्रयोगान् ।
संपद्येरन् प्रयोगा रिपुजनविहिताश् चेत् सुसाफल्यभाजो
राष्ट्रस्य स्वस्य रक्षाम् अपि च नहि वयं कर्तुमीशा भवेम ॥३५८॥

संगीताऽभ्याससक्तो भवतु जनपदे नाऽत्र कश्चिद् मनुष्यो,
बाह्यास् तौर्यत्रिकज्ञा अपि च जनपदं नाऽस्मदीयं विशन्तु ।
सम्यग् गोप्या व्यवस्था क्षितिधरपदवीदुर्गनिष्ठा स्वकीया,
याताऽयातव्यवस्थां परजनपदजा नाऽस्मदीयां विदन्तु ॥३५९॥

आस्ते शुक्ले तपस्ये कतिचन दिवसान् उत्सवो होलिकाया,
द्वित्राणां चारणानां भवतु निजपुरे हूतिरस्मिन् महे वा ।
पूर्णे होल्युत्सवे स्वात् सपदि जनपदाद् अस्तु तेषां विसर्गो,
गोप्याम् अस्मद्-व्यवस्थां लघुतरसमये तेऽल्पसंख्या न विद्युः ॥३६०॥

तपस्ये शुक्ले = फाल्गुनशुक्ले
हूतिः = आह्वानम्
महे = उत्सवे

CC-0. Nepal Sanskrit Academy, Kathmandu

नेपालद्रोणिदेशे प्रथितमभिहितं तन्त्रशास्त्रे पुराणे
नेवारैर् दर्श्यमानं प्रवभतु भवतां हृद्विनोदाय नाट्यम् ।
नेवारेभ्यो वितीर्णं द्रविणमपि निजे वर्तते देश एव,
क्षोणत्वं स्वप्रजानां नहि भवति, ततो वर्धते राष्ट्रतेजः ॥३६१॥

वितीर्णम् = दत्तम्

द्रविणम् = धनम्

उपसंहारः

मोहं सेवस्व, भूरीन् गृहजनिकलहान् दीर्घकालं भजस्व,
प्राज्यान् राष्ट्रस्य खण्डान् कुरु, रिपुविहितास् तीव्रपीडाः सहस्व ।
इत्थं व्यापृत्य कालं गतधृति नयताम् अस्तु नैपालकानाम्
एकीभावो द्रढीयान्, रिपुजनविहिता आपदः सन्तु दूराः ॥३६२॥

समुच्चयेऽन्यतरस्याम् पाणिनिः ३।४।३ इति लोट्

म्लेच्छैर् उद्वेज्यमाना न भवतु धरणी, हिन्दवः कर्मठाः स्युर्,
इत्याकारां स्वचिन्तां सफलयितुमना दीर्घकालाऽनुवृत्ताम् ।
आत्मीयानां प्रजानां हृदयविलसितं राजधर्मं विधित्सुः
पृथ्वीनारायणेशो गिरमिति मनुजान् अन्तिमां स्वान् उवाच ॥३६३॥

विधित्सुः = कर्तुम् इच्छुः

पृथ्वीवह्न्यष्टभूभिर् [१८३१] विदधति समतां विक्रमादित्यवर्षे
संक्रान्तौ माघमासे सवितरि हरितं पौरुहूतीं प्रपन्ने ।
द्वापञ्चाशात् [५२] समीनः कतिचन दिवसान् व्याधिना ग्रस्तदेहः
पृथ्वीनारायणेशो निजतनुमजहाच् श्रीत्रिशूलीप्रतीरे ॥३६४॥

पौरुहूतीं हरितम् = प्राचीम्

CC-0. Nepal Sanskrit Academy, Kathmandu

राष्ट्रं स्वकीयं बलमादधानं भूयात् समृद्धं यशसा श्रिया च ।
इत्यर्थनोदेति मनस्सु येषां, पृथ्वीवचस् तैः परिशीलनीयम् ।।३६५।।

सप्तत्यु ७० पान्तं वयसा प्रपन्नो विदचार्थिताम् एव हृदा दधानः ।
निजाम् अनूक्ति नयराज एतां दधाति हस्तेषु परीक्षकाणाम् ।।३६६।।

□

तनहुँका राजा त्रिविक्रम सेनका दश अप्रकाशित पत्र

–महेशराज पन्त

राजा त्रिविक्रम सेनले गरिदिएका वि. सं. १८०० देखि १८२६ सम्मका १० वटा अप्रकाशित पत्र यहाँ दिइएका छन् । यी पत्रमध्ये ६ वटा पत्र रजबन्धको दिई गरिएका छन्, दुइवटा पत्र जागीर दिई गरिएका छन्, एउटा पत्र बिर्ता दिई गरिएको छ, एउटा पत्र बकस दिई गरिएको छ । यसरी यी पत्रले तात्कालिक तनहुँ राज्यको विषयमा केही प्रकाश पार्छन् भन्ने स्पष्ट छ ।

यी पत्र पिताजी पं. नयराज पन्तको सङ्ग्रहका हुन् । पिताजीले यी पत्र श्रीटुकराज मिश्रबाट प्राप्त गर्नुभएको हो ।

(१ सङ्ख्या)

श्रीः

रूपनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीश्रीश्रीमहाराजधिराजश्रीश्रीश्रीमत् त्रीविक्रमसेनदेवानाम् सदा समरविजयिनाम्

CC-0. Nepal Sanskrit Academy, Kathmandu

आगे पुरकोटमध्ये रामकृष्ण धौलाडिक हाथ षेत बाधा दिहल. षिळधौल टिक षायल षेत सिमल्या १ मुरि माधौ महक षायेल गावक घडचारि १ तीन सय सतसट्टि रुपैञ्या ३६७ मा दिहल. लगा डिहि आपन वदि अम्बल करहु. षाहु. लिना दिना. महिन्द्रमलि जब रुपैया देव. तब तब बाधा छुटै.

इति संवत १८०० साल वैषा सु १० रोजमा कविलास शुभम्

(२ सङ्ख्या)

श्रीः

श्रीसांम्बशिव श्रीलक्ष्मीनारायण सहाय

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिरामचन्द्रवंशोद्भवसदासमाराधितसाम्बशिवलक्ष्मीनारायणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमन्भूपवरत्रिविक्रमसेनदेवानां सदा समरविजयिनाम्

आगे विश्वरूप अर्चजक हात माटो बाधा दिहलक. ल्यास्ति माडिमध्ये पादीखोलाक षेत दलै थापाक खायेलमध्ये षेत १ मुरि १०० औ जयनाम दर्जिक षायेल षेत १ मुरि ८० जम्मा षेत १८० तेहिं पर रुपैया ९०० अक्षरेपि रुपैया नव सय पर बाधा दिहल. डिहि बारि लगापातसमेत बकसल. आपन वदि अम्बल करहि. बसहि बसावहि. बाधा जानि भोग्य करहि. आसिर्वाद देलक रहि. लिना दिना महिन्द्रमलि जब रुपैया देव. तब बाधा छाडिदेहि.

मिति संवत् १८०९ माघसुदि ५ रोज मुकाम तन्हुं सुभम्

(३ सङ्ख्या)

श्री

स्वस्ति श्रीश्व(र)चरणसरोरुहस्मरणेत्यादिश्रींरामचन्द्रवंशोद्भवसदासमाराधितसाम्बशिवलक्ष्मीनारायणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमन्भूपवरत्रिविक्रमसेनसदासमरविजयिनाम्

आगे हिरा पन्थके हात माटो बाधा दिहल. आपन खाहिल कर्लु थुम् १ बकसल. षे १ मुरि २४० डिहि लगासमेत बकसल. आपना बदि अम्बल करहि. बसहि बसावहि षाहि. तेहि पर रुपैया ९८१ अक्षरेपि नौ सय ऐकासि लिनादिना सिक्का. जाव रुपया देव. तब बाधा छुटि.

मिति सम्वत १८१५ साल माघसुदि ११ रोज ५ मुकाम् षैन्याहिनि सुभम्

(छेउमा)

बितलब बकसल

CC-0. Nepal Sanskrit Academy, Kathmandu

(४ सङ्ख्या)

स्वस्ति श्रीश्वरसरोरुहस्मरणेत्यादिश्रीरामचन्द्रवंशोद्भवसदासमाराधितसांबशिवलक्ष्मीनारा–यणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमत्भूपवरत्रिविक्रमसेनदेवानाम सदा समरविजयिनाम्

आगे गुणनन्द पन्थ हात माटो बाधा दिहल. सालबोटफाटमधे डाडो षेत १ मुरि १०० साल–बोट मुरि ८० कालिमाटि मुरि ८० सार्क्याटारि मुरि षेतक जामुरि २८० डिहि लग्गासमेत बकसल. आपना वदि अम्बल करहि षाहिँ. पुरकोटमध्ये रिप षेत १ मुरि १२० औ दोर्दोरक पहारघाटक षेत मुरि ६० डिहि लगासमेत बकसल. सब षेतक जमा ४६० तेहिपर रुपया ७४३ अक्षरेपि सात सय त्रितालीस लिना दिना सिका. जब रुपया देव. तब बाधा छुटिहि.

मिति १८१६ साल जेष्टवदि १४ रोज ६ मुकाम तनहुग सुभम्

(छेउमा)

मुरि १ बिज जाथा सुवारासमेत बस्याथे गलोक नरियक सिवान दछिन जर पहरो पुर्व वर षोलो पश्चिम वर षोलो सिवानाकै दिहल.

(५ सङ्ख्या)

श्री

श्रीसांबशिव

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिश्रीरामचन्द्रवंशोद्भवसदासमाराधितसांबशिवलक्ष्मी-नारायणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमन्भूपवरत्रिविक्रमसेनदेवानाम सदा समरविजयिनाम्

आगे कृष्णदेव पंडीतक हात माटो बाधा दिहल. पुर्कोटमध्ये आपन बाधा खायेलमध्ये रोहटचा-पानीक षेत मुरि ४० औ सिमल्या षेत मुरि ६० औ कुमुंड्या खेत मुरि ३० औ रुमटा षेत मुरी ३० जम्मा मुरि १६० बाधा बकसल. रुपया ६०१ अक्षरेपि छ सय एक सिक्कापर बाधा दिहल औ सिउराम टारीक कुलाउँ मोल गा खेतक डिहिसमेत दिहल औ मारीकोट मकां ढकालक घडचाडि बारीसमेत दिहल. आपन वदि अमल करहि बसहि. सेवा करहि. जब रुपया देव. तब बाधा छुटि.

मिति सम्वत् १८१७ साल वैषाखसुदि १४ भौमे मु. तनहुं सुभम्

CC-0. Nepal Sanskrit Academy, Kathmandu

(६ सङ्ख्या)

श्री

श्रीसाम्बशिव

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिश्रीरामचन्द्रवंशोद्भवसदासमाराधितसाम्बशिवलक्ष्मीनारायणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमन्भूपवरत्रिविक्रमसेनदेवानां सदा समरविजयिनाम्

आगे उतिस्वा टोमटाके जागिर बकसल. दोर्दोरमध्ये कमल्या कमल्याबोटचा खेत मु ६० तेकर डिहि लगासमेत बकसल. आपत बढि अमल करहु षाहु. षीजमनि करहु.

मिति १८१८ साल वैषाखसुदि ५ मुकाम तनहु सुभम्

(७ सङ्ख्या)

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिश्रीमद्रामचन्द्रवंशोद्भवसदासमाराधितशाम्बशिवलक्ष्मीनारायणश्रीमन्महाराजाधिराजश्रीश्रीश्रीमत्त्रिविक्रमसेनदेवानाम् सदा समरविजयिनाम्

आगे स्वस्ति श्रीगुणानन्द पन्तके कज्याइ भारा बकसल.मध्येश पर्वतक ठाला कज्याइ बकसल. बिन्ति चुक्ली ज्या गदन सो सहि. अर्को दोसरो बिन्ति चुकली कसैलाइ नास्ति. कज्याइ दस्तुर खाइ सेवा करहि.

संवत १८२० मिति फाल्गुण शुदि ८ मुकाम तन्हौ

(८ सङ्ख्या)

श्रीसाम्बशिव

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिश्रीमन्रामचन्द्रवंशोद्भवसदासमाराधितसाम्बशिवलक्ष्मीनारायणश्रीमन्महाराजधिराजश्रीश्रीश्रीमन्त्रिविक्रमसेनदेवानाम सदा समरविजयिनाम्

आगे जधुपति पोषरियाका हात बाधा माटो बकसल. आपन षायल सिम षेत मुरि २०० डुमऱ्या

CC-0. Nepal Sanskrit Academy, Kathmandu

षेत मुरि ८० जंमा १८० लगासमेत बकसल. तेकर बाधाक रुपैया ३३०-५) अक्षरेपि तीन शय तिस पाच दामपर बाधा बकसल. जब रुपैया देव. तब बाधा छुटैं.

सम्वत् १८२१ मिति चैत्रसुदि १० मुकाम तन्हुँ सुभ्म्

(छेउमा)

सहि रुपैया

(९ सङ्ख्या)

सोमेश्वर

स्वस्ति श्रीश्वरचरणसरोरुहस्मरणेत्यादिश्रीमद्रामचन्द्रवंसोद्भवसदासमाराधितसाम्बशिवलक्ष्मी-नारायणश्रीमन्महाराजधिराजश्रीश्रीश्रीमत्भूपवरत्रिविक्रमसेनदेवदेवानाम सदा समरविजयिनाम्

आगे गुणानन्द पंतके चोकको बिर्ता बांधा बितलबकैं नेवारसुद्धा बकस्यौ. गौवध ब्रह्मवध स्मृति राषि सर्व अंक यहादेखि पछि लियाको माटो पनि सर्व अंक माफ गरिबक्स्यौ. आपन बितलब जानि बसहु बसाहु अम्बल करहु. शुखभोग करहु.

इति संवत १८२६ मिति वैशाकसुदि ५ मुकाम

(१० सङ्ख्या)

स्वस्ति श्रीरूपनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीमहाराजाधिराजश्रीश्री-मत्त्रिविक्रमसेनदेवानाम् सदा समरविजयिनाम्

श्रीमान थापाके कुसलाइपूर्वकपत्रमिदं. आगे मेठक रुपया १००७ सय गुनानिधी पंथके बरातकैं दिहल. घाटसे पत्र देखत देघा लहु. सर्वथा ३

इति बै. सु. १२ वन्दिपुर

○

CC-0. Nepal Sanskrit Academy, Kathmandu

कालिदास, भास्कर, गणेश, कमलाकरका केहीं उक्ति

अनुवादक – नयराज पन्त

कस्याऽत्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर् गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।

कालिदास

पाएथ्यो जिन्दगीमा अविरत सुख वा दुःख मात्रै त कल्ले,
पाङ्ग्राको धार जस्तै तलतिर कहिले पर्छ त्यो माथि कैले ।

ये वृद्धा लघवोऽपि येऽत्र गणका बद्ध्वाऽञ्जलिं वच्मि तान्
क्षन्तव्यं मम तैर् मया यदधुना पूर्वोक्तयो दूषिताः ।
कर्तव्ये स्फुटवासनाप्रकथने पूर्वोक्तिविश्वासिनां
तत् तद् दूषणमन्तरेण नितरां नाऽस्ति प्रतीतिर् यतः ।।

भास्कराचार्य
वि. सं. १२०७

ठूला साना सब गणकको सामुमा हात जोडी
खोली आफ्नो हृदय अहिले गर्छु यौटा म बिन्ती ।
ठूला ठूला प्रतन बुधका ग्रन्थका दोषलाई
देखाएँ जो त्यस विषयमा होस् क्षमा नै मलाई ।।१।।

साँचा साँचा विषय नभने वासना स्पष्ट हुन्न,
विद्वान् लिन्नन् त्यसकन छ जो वासनाले विहीन ।

CC-0. Nepal Sanskrit Academy, Kathmandu

राख्छन् प्राय प्रतन कृतिमा लोक विश्वास धेर,
गर्नैपर्छ प्रतन कृतिको सत्परीक्षा तसर्थ ।।२।।

पूर्वे प्रौढतराः क्वचित् किमपि यच् चक्रुर् धनुर्ज्ये विना
ते तेनैव महाऽऽतिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाऽखिलं लघु कृतं हित्वा धनुर्ज्ये मया,
तद्गर्वो मयि माऽऽस्तु किन्तु तदहं तच्छास्त्रतो वृद्धधीः ।।

गणेश दैवज्ञ
वि. सं. १५७७

छोडी ज्या-चापलाई अलिकति गणना गर्न सक्ता पुराना
ठूला विद्वान् चढेथे स्मयमय दरिलो शैलको टाकुरामा ।
छोडी ज्या-चापका ती सकल विधिहरू युक्तिको साथ ऐले
जम्मै सिद्धान्तलाई सरल गरिदिएँ प्रौढतासाथ मैले ।।१।।

पैलेका ती प्रथित बुधका ग्रन्थलाई पढेर ।
मेरो बुद्धि क्रमसंग बढ्यो, यो कुरो हो यथार्थ ।
भन्ने मेरो हृदयतहमा नित्य उर्लन्छ भाव,
त्यल्ले गर्दा यस विषयमा छैन मेरो त गर्व ।।२।।

यैर् यैः श्रमैस् तत्त्वविवेक एष
सद्गोलयुक्त्या रचितोऽस्ति तेषाम् ।
सर्वज्ञकोऽभिज्ञ इह त्वदन्यो
नेत्थं विचिन्त्यैष तवैव तुष्ट्यै ।।

समर्पितस् त्वच्चरणाऽम्बुजेऽतो
मयाऽऽस्य सद्बोधविवृद्धयेऽस्ति ।।
...
कुर्वीश संपूर्णकृपाकटाक्षम् ।

कमलाकर
वि. सं. १७१५

CC-0. Nepal Sanskrit Academy, Kathmandu

घेरै घेरै दिन गणितमा गोलमा बुद्धि खयाएँ,
ज्यादै घेरै मिहिनत गरी ग्रन्थ मैले बनाएँ ।
मेरो जम्मै श्रम बुझिदिने छैन कोही मनुष्य,
बुझ्छौ मेरा श्रम सब तिमी मात्र सर्वज्ञ देव ।।१।।

होओस् राम्रोसँग गणितको गोलको सत्य बोध
यो पृथ्वीमा विकसित भनी भित्र राखेर आश ।
मैले तिम्रो चरणतलमा ग्रन्थ आफ्नो चढाए,
पर्ला तिम्रो यसतिर कृपादृष्टि हे सत्यमूर्ते ।।२।।

○

स्वावलम्ब

— नयराज पन्त

आधार आफ्नै मनको लिईकन
गरेर आफ्नै श्रमले उपार्जन ।
जो खान्छ औ गर्दछ साधनाकन
यथार्थ वस्तु सक्तछ बुझ्न त्यो जन ।।१।।

परी अरूका भरमा रहन्छ जो
सक्तैन राम्रोसँग वस्तु बुझ्न त्यो ।
त्यसै हुनाले त्यसका विचारमा
हुन्छन् अनेकौं अयथार्थ भावना ।।२।।

वि. सं. २०२९।१२।२९।४

▭

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्णिमा (इतिहास-प्रधान त्रैमासिक पत्रिका) का. मे. अ. द. नं. १५५/२४६

कार्यालय-

संशोधन – मण्डल

१०/३७४ वटु सवलबहाल, काठमाडौं, नेपाल

वि. सं. २०३९ भाद्र

यस अङ्कको मूल्य रु. ८।

मुद्रक-
लुम्बिनी प्रेस
नयाँ बानेश्वर, काठमाडौं, नेपाल